INTRODUCTION.

साक्षाज्जिनाधिपतिधर्मनृपाङ्गरक्षो
जागर्ति नार्त्तितमना भुवि वस्तुपालः ।

The Sukṛtasankîrtana is a historical Mahâkâvya describing the good deeds of Vastupâla. It consists of eleven cantos, and at the end of each canto are appended five verses composed by Amara Paṇḍita. Three out of these are eulogistic, the fourth mentions Arisimha as the author of this work and praises his poetical skill, while the fifth records the fact that these four verses are composed by Amara.

The popularity of the work. The Sukṛtasankîrtana does not seem to have been p even among the Jains. Verses from Someśvara's Kîrtikaumudî are often found in the Prabandhakośa and Jinaharsha's Vastupâlacharitra, but none from the Sukṛtasankîrtanâ. Bâlachandra has also composed his Vasantâvilasa on the style of the Kîrtikaumudi.

Literature about Vastupâla. The main works about Vastupâla's history are as under.—

Contemporary.

I	Sukṛtasankîrtana.	
II	Kîrtikaumudî.	
III	Dharmâbhyudaya.	Udayaprabha
IV	Sukṛtakîrtikallolinî.	Udayaprabha
V	Hammîramadamardana.	Jayasimha Sûri.
VI	Vastupâla-Tejahpâla Pras'asti	Jayasimha Sûri.
VII	Vasantavilâsa by Bâlchandra.	

Later.

VIII Vastupâlaprabandha in the Prabandhachintâmaṇi

IX Vastupâlaprabandha in the Chaturvimśatiprabandha.

X Vastupâlacharitra of Jinaharsha.

The author and his religion. The author of the Sukṛtasankîrtana is Arisimha, son of Lavaṇasimha. He was a protege of Vastupâla and we understand from the *Upadeśataranginî* that like Someśvara, the author of the Kîrtikaumudî, he too got a *giras* and other gifts for this work.[1] It is not clear to what caste he belonged, whether he was a Bania or a bard. He has got the appellation Ṭhakkura and this appellation was

(1) स्वसङ्कीर्तनगुणतुल्यपूर्वजावदातप्रतिपादककीर्तिकौमुदीसुकृतसङ्कीर्तनकाव्यकर्तृसोमेश्वरारिसिंहयोर्ग्रामग्रासाश्वदुकूलादिदानं यावज्जीवाईं दत्तम् ।

common among the Banias too. As to his religion, it is not quite certain whether he was a Jaina or a Shaiva. The fact of his bringing the spirit of Kumârapâla and making him to order Bhîma to revive the glory of Jainism speaks in favour of his being a Jaina, while his omission of salutation to Jina in the beginning of his poem and his telling us that Vastupâla's mother Kumâradevî, though a leader among those following Jainism, had faith in S'iva too, which is not mentioned by any other writer, may lead one to believe that he was a S'aiva, of course, not staunch. Jahlaṇa's Sûktimuktâvalî quotes four verses of Arasî Ṭhakkura[2], who is most probably the same as our author.

---

(2) अतिविपुलं कुचयुगलं रहसि करैराम्रशन्मुहुर्लक्ष्म्याः ।
तदपहृतं निजहृदयं जयति हरिर्मृगयमाण इव ॥
मध्येन तस्या विजितः कृशाङ्ग्या· पञ्चानन काननबद्धवास· ।
तस्या स्तनस्तम्भतटीधियैव कुम्भौ गजानां कुपितो भिनत्ति ॥
दधिमथनविलोलल्लोलदृग्वेणिदम्भादमदयमनङ्गो विश्वविश्वैकजेता ।
भवपरिभवखेदत्यक्तबाणः कृपाणभ्रमामिव दिवसादौ व्यक्तशक्तिर्बिभ्यारिक्षि॥
कान्ताऽस्मद्दैवगत्या कथमपि गमितान्यन्तरालेत्यमक्ष्या-
ण्युड्डीयोड्डीय भूयस्तरुशिखरशिखामेव तेभ्य श्रयन्ते ।
इत्थं त्वद्वैरिनारी गिरिषु नरपते ! जंबुलुम्बीकदम्ब-
भ्रान्त्या मर्तुर्बुभुक्षोः कथयति पुरतश्चेष्टितं पट्पदानाम् ॥

Jahlaṇa's Sûktimuktâvalî.

Amarachandra and his relation with Arisinha. Amarachandra is an illustrious figure in Sanskṛta literature. The fame of his works was *not only restricted among the Jainas, but* also extended to the Brahmins among whom his works Bâlabhârata and Kavikalpalatâ were popular. His other available works are Chhandoratnâvali, Syâdiśabdasamuchchaya & Padmânanda Kâvya. The last work was composed at the request of Kosṭhâgârika Padma, a Vâyaḍa Bania of Pattan[3] It is otherwise known as Jinendracharitra, as it gives the lives of Tirthankaras. The Prabandhakos'a mentions two other works of his, Sûktâvali and Kalâkalâpa. He compared in one place in his Bâlabhârata the braid. (वेणी) to a sword and for this he was known as Veṇikṛpâṇa Amara. Amara was the pupil of Jinadatta S'ûri of Vayaḍagachchha, the author of the Vivekavilasa. Jinadatta Sûri's name is mentioned in this poem among the Âcharyas who accompanied in Vastupâl's pilgrimage to Satruñjaya Tne Prabandhakos'a tells us that Amarachandra got the charm of Siddhasârasvata from Kavirâja Arisimha, pupil of Jinadatta Sûri and by his chanting this for twenty one days the Goddess of Learning appeared before him from the disc of the moon

(3) पद्मेनाभ्यर्थितः स श्रीजिनेन्द्रचरिताह्वयम् ।
वायडान्वयो महाकाव्यं विदधे निर्ममेश्वरः ॥ पद्मानन्द १-४।

at the midnight of the twenty-first day and gave him the boon that he would be a Siddha Kavi, honoured by all kings. The same Prabandha describes his entry into the court of Vîsaladeva and through him of his teacher in fine arts, Arisimha. But the Prabandhachintâmaṇi tells us that Amarachandra had entered the court of Dholka in the time of Vastupâla and was recognised as a poet of power and note. Amarachandra does not mention in any of his published works that he was a pupil of Arisimha in fine arts but it is only clear from the works that he held Arisimha and his poetry in high esteem. The story about Amara's getting Siddhasârasvata charm from Arisimha and also his introduction of Arisimha into the court of Vîsaladeva should be accepted with much reserve. One thing is, however, clear from this that both Amara & Arisimha occupied a remarkable position in the literary court of Vîsaladeva. Just as Amarachandra had composed four verses in the Sukṛtasankîrtana, so the Sûtras of Kavikalpalatâ of Amarachandra were composed partly by Arisimha and partly by Amara.[4] Amarachandra mentions

(4) सारस्वतामृतमहार्णवपूर्णिमेन्दोर्मत्वाऽरिसिंहसुकवेः कवितारहस्यम् ।
किंचिच्च तद्रचितमात्मकृतं च किंचिद्व्याख्यास्यते त्वरितकाव्यकृतेऽत्र सूत्रम् ॥
काव्यकल्पलतावृत्ति I–1 ।

in his Kavikalpalatâ one more work of Arisimha, Kavitârahasya Amrachandra calls Arisimha in the Sukṛtasankîrtana as an able disputant.

Analysis of the Work The *first* canto gives the genealogy of the Châpotkata kings Of Vanarâja it is said that he founded the city of Anahilla Pattana and that he erected there the temple of Pânchâsara Pârśvanâtha. After him Yogarâja, Ratnâditya, Vairisimha, Kshemarâja, Châmunda, Râhada, & Bhûbhata successively ruled over Gujarat This list of Châvdâ kings is identical with that given in the Sukṛtakîrtikallolinî of *Udayaprabha* In view of the concurrence of these two authorities, the statement in Krishnâji's Ratnamâlâ, which is not so old as is believed, is unreliable.

The *second* canto describes the reigns of the Chaulukya kings Mûlrâja's pilgrimage to Somes'vara every Monday is also mentioned in Bâlachandra's Vasantavilâsa The fourth verse refers to his erection of Tripurusha Prâsâda in Anahillavâda Mûlaraja defeated Bârapa, the general of the king of Kânyakubja, and Laksha king of Cutch Vallabharâja's victory over the king of Mâlvâ is celebrated in verse 13th. He had the *biruda* of Jagajzampana This *biruda* is found in the Kumârapâlapratibodha, Kîrtikaumudî, Sukṛta-

kirtikallolonî and Vasantavilâsa. Durlabharâja was very modest and was ashamed when his court poets compared him to Krishna. Bhima defeated Bhoja of Dhârâ. Karna conquered the king of Mâlvâ and brought home from there an image of Nîlakantha Siva. Jayasimha conquered Barbaraka and took prisoner Yas'ovarma, king of Dhârâ. He had the tank called Siddhasaras dug and a high pillar of victory built. Jayasimha was very devotional towards his mother. Kumârapâla abolished the confiscation of the property of tradesmen dying without male heirs and caused Jaina temples to be built in every city. He conquered the king of Jângla, Arnorâja of Sâkambharî, and his general Âmbada, who was a Bania, defeated and killed the Kadamba king Mallika Arjuna of the Konkana. This victory of Ambada is corroborated by Bâlchandra in his Vasantavilâsa. Ajayadeva generally called Ajayapâla got from the king of Sâmbhara a golden Mandapikâ. Mûlarâja II, though a child, defeated the Turushkas, Mahamad Sahabuddin Ghori. Bhimadeva II was very charitable and extravagant. His kingdom was being devoured by his powerful Mandalesas, whom he was unable to control. Bhîma was thus filled with anxiety about the fate of his kingom. One

night a glorious and splendid god, the spirit of his grand-father Kumârapâla, appeared to him in a dream and said that in order to restore order and to prevent dismemberment of the kingdom and to save the Jain faith, which was almost sinking, he should make Lavaṇaprasâda, son of Arṇorâja, son of Dhavala, to whom he had given the principality of Bhîmapallî, his Sarveśvara and make his son Vîradhavala his Yuvarâja. Vîradhavala then requested king Bhîma to give him good counsellors. Bhîma said that there served in this realm, Chaṇḍapa fiery in splendour, of the Porvâda lineage. His son was Chaṇḍaprasâda. His son Soma, who served under Jayasimha, acknowledged no master but king Siddharâja Jayasimha, and no god but the lord of the Jinas. His son Aśvarâja who made the universe splendid with his glory made seven pilgrimages in order to escape seven hells. His wife Kumâradevi, though eminent in the Jaina religon, also had faith in Śiva. They had three sons–Malladeva, Vastupâla & Tejahpâla Bhîma then gave Vastpuâla and Tejahpâla as Vîradhavala's counsellors, and said to him that his heroism, which will have sight with these two as eyes, may now trample down his enemies by [illegible]g them out. The two ministers should fulfil the message of Kumârapâla–the glorification of

the Jaina faith This account, though it materially differs from that given by Somesvara in his Kîrtikaumudî, agrees with that in the two other contemporary works – (1) Jayasimha's Vastupâla-Tejahpâlaprasasti & (2) Udayaprabha's Sukṛta kîrtikallolinî Vastupala's own words should have, however, more weight in this respect In the Naranârâyanânanda he calls himself as the high minister of the Gurjaresvara and in its last canto he says that he accepted the dependence of the high-ministership of Bhîma, the lord of Gujarat, for the incessant occurence of the festival of faith without any obstacle, which is sweet on account of its splendid power[5] Bâlchandra's account, however, agrees with that of Somesvara

In the *fourth* canto Arisimha says that Vîradhavala with the help of his ministers conquered the earth and put down all wrong and violence Tejahpâla then requested Vastupâla to keep in mind the king's command and support the Jaina religion. Both approached their spiritual family preceptor Vijayasena Sûri of the Nâgendragachcha On this occasion the succession of the priest of this gachchha is given (1) Mahendra Sûri (2)

(5) भास्वत्प्रभावमधुराय निरन्तरायधर्मोत्सवव्यतिकराय निरन्तराय ।
यो गूर्जरावनिमहीपतिभीमभूपमन्त्रीन्द्रतापरवशत्वमपि प्रपेदे ॥ XV 135

Shânti Sûri and Amara Sûri, who received from king Jayasimha the title-" Tiger Cubs " as they had overcome proud disputants even in their infancy (4) Haribhadra Sûri (5) Vijayasena Sûri. Vijayasena Sûri explained to them the religious merits of becoming a Sanghâdhipati. Vastupâla resolved to do so.

In the *fifth* canto are described the preparations for the great pilgimage. Narachandra Sûri of the Maladhâri gachchha and spiritual adviser of Vastupâla on his mother's side, Jinadatta Sûri of the Vâyada gachchha, Sânti Sûri of the Sanderaka gachchha and Vardhamâna Sûri of the Gallaka people were among the notable Âchâryas who accompanied. Mention is made of a halt at Kâsahrada, modern Kâsandra, and of the institution of a great festival in the temple of Rshabha.

In the *sixth* canto we have a conventional desciiption of the sun-rise.

In the *seventh* canto is described the ascent of the mountain and the devotional festivities. After paying his respects to Kaparadi Yaksha, the presiding deity of the Tîrtha, Vastupâla entered the main temple of Âdinâtha. The Sangha stayed on the mountain for eight days.

In the *eighth* the pilgrimage to Deva-

pattana and Mount Girnar is described. From Santrunjaya the Sangha started to Devapattana for offering worship to Somanâtha. Thence it proceeded to Girnar. A camp was pitched at the foot of the mountain and a festival was held. Then follows the description of the worship of Neminâtha and the festivals. Having paid homage to Ambâ, the presiding deity of the Jain temples on Mt Girnar and Sâmba and Pradyumna who had obtained salvation here, the Sangha descended after a stay of eight days

In the *ninth* is given a poetical description of the six seasons which the minister saw while descending.

In the *tenth* begins the return journey. The Sangha entered Vâmanasthali–the modern Vanthali, in all magnificence. When the procession reached near Dholka, not only Tejahpâla but Vîradhavala came out with citizens to receive him. For a fuller description of the pilgrimage compare the last canto of the Dharmâbhyudaya and the cantos eleven and twelve of the Vasantavilâsa.

In the *eleventh* canto the author describes the temples built and restored by Vastupâla.

In Anahilavâda Pattan:–

(1) The restoration of the temple of Panchâsara Pârsvanâtha of Vanarâja.

In Cambay:-

(2) The erection of a golden staff and knob on the temple of Bhîmes'a.

(3) The erection of an Uttânpaṭṭa before Bhaṭṭâditya and of a golden wreath on his head.

(4) Excavation of a well in the temple grove called Vahaka of Bhaṭṭârka.

(5) The erection of a vestibule before the temple ef the Sun-god Bakula.

(6) The restoration of the Maṇḍapa and of the temple of Vaidyanâtha.

(7) The erection of high-walled enclosures for the sale of sour milk to avoid contamination.

(8) The erection of two Upâśrayas.

(9) The erection of a drinking hall with round windows on two sides.

In Dholka:-

(10) The building of a temple of Âdinâtha.

(11) The erection of two Upâśrayas.

(12) The restoration of the temple named Râṇaka of Bhattârka.

(13) The construction of a Vâpî.

(14) The erection of a Prapâ.

On the Satruñjaya Hill:-

(15) The erection of an Indramaṇḍapa before the temple of Âdinâtha.

(16) The erection of the temples of Neminâtha and Stambbana Pârśvanâtha.

(17) The erection of a statue of the Goddess of Sarasvatî.

(18) The erection of the statues of his ancestors.

(19) The setting up of three statues on elephants, his own, that of Tejahpâla and that of Vîradhavala.

(20) The erection of sculptures representing four summits of Mt. Girnar, Avalokana, Ambâ, Sâmba, and Pradyumna.

(21) The preparation of a Toraṇa before the temple of Âdinâtha.

(22) The erection of temples of Suvṛta of Broach and Mahâvira of Sâchor.

(23) The erection of a Pṛsṭhapatta of gold and precious stones below the image of Âdinâtha.

(24) The raising of a golden Toraṇa.

In the vicinity of Pâlitâṇâ:-

(25) The excavation of a large tank.

(26) The erection of an Upâs'raya.

(27) The erection of a Prapâ.

In the village of Ankevâliyâ:-

(28) The digging of a tank.

On Mt. Girnar:-

(29) The erection of temples of Stambhana Pârśvanâtha and Adîsvara of Satruñjaya.

In Stambhana (Thâmna near Umreth):-

(30) The restoration of the temple of Pârśvanâtha.

(31) The erection of two Prapâs near the temple of Pârśvanâtha.

At Dabhoi:-

(32) The placing of golden capitals on the temple of Vaidyanâtha, as the old ones were carried off by the king of Mâlvâ and also the erection of an image of the Sun-god.

On Mount Âbu:-

(33) The building of a niche of Mallideva (in Samvat 1278) for the religious merits of the spirit of his elder brother Malladeva.

For fuller and more complete list of Vastupâla's temples and works of piety and public utility, the reader is referred to Jinaharsha's Vastu-

The date of the composition of the work. The Sukṛtasankîrtana was written before Samvat 1287, in which year the incriptions on Mt. Âbu are dated., and after 1278 the date of building a niche of Mallinâtha on Mt. Âbu, mentioned in the present work.

Dr. Bühler contributed a very valuable and exhaustive paper, *Das Sukritasankîrtana*, in the *Sitzungberichte* of the Imperial Academy of Sciences of Vienna (Vol. CXIX, 1887) and an English translation of the German paper was published in the Indian Antiquary Vol. XXXI (1902) pp. 477-495. For a complete and critical study of the career of this one of the greatest minister Gujarat has ever produced, one should read the introductions to the Naranârâyaṇânanda, Vasantavilâsa and Hammîramadamardana in the Gaekwad's Oriental Series. A photo of the statutes of Vastupâla and his two wives will be found in the edition of the Naranârâyaṇânanda in the same series.

CONTENTS.



॥ सुकृतसंकीर्तनकाव्यान्तर्गतैतिहासिकनामाक्षरानुक्रमणी ॥

॥ सुकृतसंकीर्तनकाव्यान्तर्गतदेशनामाक्षरानुक्रमणी ॥

॥ अर्हम् ॥

॥ न्यायाऽम्भोनिधिश्रीमद्विजयानन्दसूरिभ्यो

श्रीमदरिसिंहविरचितं

सुकृतसंकीर्त्तनम् ।

श्रीवेश्मविस्मयमयमवलम्बताप-
चापोत्कटान्वयवनैकहरिर्नरेन्द्रः ।
आसीदसीमचरितः परितप्तशत्रु-
भालार्पिताङ्घ्रिनलिनो वनराजदेवः ॥१॥

यत्खङ्गखण्डितविरोधिशिरोधिरक्त-
स्रोतस्विनीभिरुदधिर्विदधे सरागः ।
येनाधुनाप्यरुणतां भजतस्तदङ्ग-
सम्पर्कतोऽर्कशशिनावुदयक्षणेषु ॥ २ ॥

निर्गत्य कोशकुहरादसिदन्दशूकः
श्यामो यथागतमगाच्चरितं यदीयः ।
एतेषु मा स्म विशदेष परैरितीव
स्कन्धेषु येन विद[illegible] कराङ्गुलीभिः ॥ ३ ॥

खड्गाङ्कसङ्कटकरस्तरवारिलग्न-
कृत्तारिमुण्डमिषतः समराङ्गणे यः ।

भालाधिरोपितहुताशनचण्डचक्षु-
राभादिभासुरविरोधिविभासुरश्रीः ॥ ४ ॥
तेने कृतान्तसमतां रसनासनाभि-
धारोद्धुरो यदसिरञ्जनमञ्जुलश्रीः ।
अज्ञाय यस्य युधि दर्शनसंज्ञयैव
भिन्दन्नरीनधित किङ्करतां कृतान्तः ॥ ५ ॥
स्तब्धमकम्पितविलीनविवर्णगात्रैः
खिन्नैर्विभङ्गुररवस्फुरदश्रुलेशम् ।
उन्मुच्य पौरुपमवाप्य च भीरुभावम् ।
यः सेव्यते रिपुभिरुत्पुलकैः प्रसन्नः ॥ ६ ॥
आकर्ण्य तूर्णमुपकर्णयितुं च यस्य
कीर्तिं मुहुर्भुजगभीरुगणेन गीताम् ।
चक्षुःश्रवा रसवशेन दृशां निमेषो-
न्मेपक्रियामनिमिषोऽपि चकार शेपः ॥ ७ ॥
वक्रीकृते धनुपि मौक्तिकताडपत्र-
ज्योत्स्नाम्बुभारभृति पल्वलतां दधाने ।
यस्याननं विकचवारिजकल्पमन्त-
र्भेजे विहाय परराजकरान् जयश्रीः ॥ ८ ॥
श्रीमत्पुरं भुवि पुरन्दरपत्तनाभं
तेनादधेऽणहिलपाटकनामधेयम् ।

---

१ ग-विशीर्ण° ।

स्त्रीणां मुखे स्मरतपस्विवनेऽजनीन्दु-
पद्मश्रियोरसुहृदोरपि यत्र योगः ॥ ९ ॥
अन्तर्वसद्घनजनाद्भुतभारतो भू-
र्मा भ्रश्यतादिति भृशं वनराजदेवः ।
पञ्चासराह्वनवपार्श्वजिनेशवेश्म-
व्याजादिह क्षितिधरं नवमाततान ॥ १० ॥
यस्मिन्सदैव निकृतानि निकेतनाग्र-
जाग्रन्मणिद्युतिभरैर्नितमां तमांसि ।
आरामकालिममिषेण बहिः स्थितानि
तानि प्रसर्प्पदरघट्टरवै रटन्ति ॥ ११ ॥
जाड्यं जनेषु रजनीजनितं विभिन्द-
न्नुद्दीपयन्नपि दिवाकरकान्तचुल्लीः ।
जालान्तरागतकरस्तरणिर्द्दिनापि
यस्मिन्नभूदनुगृहं ननु सूपकारः ॥ १२ ॥
यस्मिन्विलाससदनेषु विलासवत्यः
पत्युः करेऽपहृतवस्त्यगरोत्तरीयम् ।
रत्नप्रदीपविफलीकृतफूत्कृतास्त-
न्नेत्रे निमील्य सुचतो दधतेऽन्धकारम् ॥१३॥
पर्वक्षणे न खलु निश्चिनुते दिनेषु ।
सूर्यं सुवर्णसुरसद्मकिरीटकुम्भैः ।
यत्रोन्नतालयशिरःशुरयोषिदास्यै-
र्नैव क्षिपापतिमपि क्षणदासु राहुः ॥ १४ ॥

१ ग-क्षपाप° ।

सङ्कोचिताम्बुजकुलोऽपि हतार्ककान्त-
क्रीडोऽपि पीडितरथाङ्गकुटुम्बकोऽपि।
प्रातः प्रयाति विधुरुज्ज्वल एव यत्र
सौधावनिस्खलितधामनि धामनाथे ॥ १५ ॥
रुद्धेऽपि यत्र मरुदध्वनि वारिवाहै-
र्लोकः सदा नियमभानुविलोकभोजी।
पूर्वाद्रिमौलिगतमेव गृहाधिरोहा-
दर्कं विलोक्य लगति व्यवसायवीथ्याम् ॥ १६ ॥
यत्र प्रतिक्षणविवृद्धरसातिरेक-
निष्कम्पदम्पतिकदम्बककैतवेन।
रत्या सहाजनि निकाममनेकमूर्त्ति-
रेकाङ्गमोहनरसैः स्मृतिभूरतृप्तः ॥ १७ ॥
यत्रोच्चसौधभुवि सव्यकरात्तपिण्ड-
विश्रम्भिणां गगनसिन्धुजलद्विपानाम्।
कुम्भान्विभूषयति भीरुगणः स्वभाल-
सिन्दूरधूलिभिरसव्यकरोद्धृताभिः ॥ १८ ॥
यस्मिन्नुपर्युपरि गन्तुमशक्नुवन्तो
दूरेण सूरतुरगाः परितः स्फुरन्तः।
उच्चैर्विशालमणिसालगतस्वबिम्ब-
स्पर्द्धार्द्धुनर्दिनमितिं परिमाणयन्ति ॥ १९ ॥
चेद्योग्यतास्ति परिखां पिब मे त्वमेहि
विन्ध्योऽप्युदश्चतु मयापि हतोऽर्कमार्गः।

यत्रेति केतुपटकिङ्किणिकारवैः खे
वप्रो वदत्युदधिपायिनमप्यगस्तिम् ॥ २० ॥
मन्दाकिनी वियति तुङ्गविशालसाल-
रोधद्विधामसृमरा परितः स्फुरन्ती ।
शङ्के सुराधिपनिनिग्रहविग्रहाय
यत्रान्तरालपरिखाश्रियमादधाति ॥ २१ ॥
भुग्नानि भूमिधरभासुरसालभित्ति-
भागेषु मारविवराण्यभितोऽपि यत्र ।
व्योमापगाजलगजप्रतिमानसीम-
निर्मग्नदन्तहतिलक्ष्मनिभानि भान्ति ॥ २२ ॥
यद्रत्नवेश्मपरिमार्जनिकारजोभि-
र्दूरोज्झितैरुपवनावनिदोषभीत्या ।
अभ्रंलिहो जगति यः पटुरत्नगर्भैः
कूटः किलाजनि जनेषु सुरत्नसानुः ॥ २३ ॥
यस्मिन् जनाय मणिवेश्मविभाविभिन्न-
ध्वान्तोत्करेऽपि कथयन्ति विभातभावम् ।
लीलासरोवरसरोरुहिणीविकाश-
सौरभ्यलुभ्यदलिनीकलकूजितानि ॥ २४ ॥
सत्यभ्रमेण कृतकानि गृहेषु हत्वा
हन्तव्यरूपकशतानि विशीर्णदन्तः ।

---

१ ग-भग्नानि ।

सत्यान्यपि प्रतिभयेन न तानि हन्ति
सम्प्राप्तधर्म इव यत्र विडालकोऽपि ॥ २५ ॥
यद्दानिदानमुदितेन वनीपकेन
लभ्यः प्रभूतसुकृतैः कथमप्यवाप्तः ।
छायाविभूषणपयोऽर्पणहेतुरेव
देवद्रुरत्नसुरभीविभवोऽपि भेजे (?) ॥ २६ ॥
तत्रावनीविबुधभूद्वनराजराज्य-
राजीवभानुररिवर्गवनीकृशानुः ।
श्रीयोगराज इति यस्य रराज पाणि-
पद्मेऽब्धिपक्षसुभगा भ्रमरीव भूमिः ॥ २७ ॥
यस्यासिधेनुफलके नवनागवल्लि-
पत्रोपमे मुखमुपेयुषि भूभुजङ्गैः ।
सद्यस्करक्तरसनैरभिवीरशय्या-
माश्लिष्यते स्म जगती नवमोहनेन ॥ २८ ॥
भारं भुवो भुजभरेण बभार रत्ना-
दित्यस्ततः क्षितिपमण्डलमौलिरत्नम् ।
चण्डासिदण्डदलितोरुतरावनीभृ-
द्वंशालिविस्फुरितमौक्तिककल्पकीर्तिः ॥ २९ ॥
आदेशपत्रमिव यत्तरवारिदण्डं
वीक्ष्यैव दण्डधरचण्डधराधिपस्य ।
चक्रे प्रयाणकमरातिनरेन्द्रवर्गः
स्वर्गं प्रति त्वरितमद्भुतभीतिभावात् ॥ ३० ॥

दुर्वारवारणघटोत्कटवैरिसिंहः
श्रीवैरिसिंह इति भूदयितस्ततोऽभूत् ।
यत्कीर्तिकान्तिविशदेषु जगत्सु पाणि-
स्पर्शेन चन्द्रमसमाकलयन्ति ताराः ॥ ३१ ॥
प्रत्यर्थिपार्थिवगणः समराङ्गणेषु
ग्रीष्मातिभीष्मतरणिद्युतिभारतुल्यैः ।
तप्तो महोभिरिव यस्य कृपाणवल्लि-
धारागृहव्यतिकरव्यसनी बभूव ॥ ३२ ॥
श्रीक्षेमराजनृपतिर्वसुधां सुधांशु-
ज्योत्स्नासमुज्ज्वलयशाः प्रशशास तस्मात् ।
यस्यासिवल्लिरिभकुम्भविभेदलग्न-
मुक्ताफलैः कुसुमिता फलिता जयेन॥ ३३ ॥
धूमीभवद्यदसिवल्लिरतीवतीव्रः
कोपानलः किमपि यस्य हृदि प्रदीप्तः ।
प्रत्यर्थिपार्थिवचमूरमणीसमूह-
बाष्पाम्बुभिर्भृशमयं शमयांबभूवे ॥ ३४ ॥
विश्वप्रभुः कुतुककन्दुकितारिमुण्ड-
श्चामुण्डराज इति राजयति स्म तस्मात् ।
पूरे प्रसर्पति यदीययशस्तटिन्या
दूरादमज्जदुडुपः सह तारकौघैः ॥ ३५ ॥
निर्यन् पयोमयपयोधिजलाद्वनान्ते
वीक्ष्याभितो जगति यस्य यशःप्रकाशम् ।

अद्यापि नापतति पारमिति प्रसर्पन्
लोकान्तशैलशिखरैः स्खलितो मुरारिः ॥ ३६ ॥
आसीदथ प्रबलशत्रुयशःशशाङ्क-
श्रीराहुराहड इति क्षितिजीवितेशः ।
निर्लोठितोऽद्भुतयदीयकलाकलापै-
र्मग्नः शशी किल तदीययशःसमुद्रे ॥ ३७ ॥
यत्कीर्त्तिमेव धवलामवलोक्य लोके
लोकोऽयमन्वहममन्यत पूर्णमासीम् ।
एतां पुनः सततमात्मनि चन्द्रचारुं
पश्यन्कुहूतिथिवितर्कमवापदर्कः ॥ ३८ ॥
श्रीभूभटो रिपुभटोच्चयभेदरक्त-
प्रोल्लासपल्लवितखड्गलतस्ततोऽभूत् ।
दिक्कुम्भिकुम्भमिपदिग्वनिताकुचाग्र-
क्रीडाविशृङ्खलयशा जगतीभुजङ्गः ॥ ३९ ॥
दानच्छटासुरभिशीतलदिक्करेणु-
लीलाचलश्रवणतालभरुत्तरङ्गैः ।
यत्कीर्त्तिमन्वहमिलाग्रविलासखिन्नां
दिग्योषितो जलधिसीमनि वीजयन्ति ॥ ४० ॥
दरहसितसितानि तानि तन्व-
न्नतनुतमानि जगत्रयीयशांसि ।
चिरमयमवनिं शशास भास्व-

क.-' निभानि भानि ' इति पाठः ।

त्तरतरवारिनिवारितारिवर्गः ॥ ४१ ॥

किञ्च—

दीर्घायुर्भवतादिति द्विजवरैर्ब्रह्मायुरित्यन्वहं
वन्दीन्द्रैरजरामरेति च कुलस्त्रीभिस्त्वमाशास्यसे ।
श्रीमन्त्रीश्वरवस्तुपाल ! किमपि ब्रूमस्तु विस्तारिणी
कीर्तिर्नृत्यति यावदेव दिवि ते तावद्भवानन्दतात् ॥१॥

उद्भ्रान्तैः सहसा पिनाकचलने क्षीरार्णवोल्लङ्घना-
ज्जङ्घालैः खरदूपणप्रशमनप्रारम्भसंरम्भितैः ।
उच्चै रावणनाशभासुरतरैरेभिर्यशोभिर्बभौ
श्रीसोमान्वयजोऽयमर्ककुलजक्षोणीधरस्पर्द्धया ॥ २ ॥

जैनं किलैनं जगदुः शिवेऽपि
श्रीवस्तुपालः सचिवस्तु भक्तः ।
शङ्काहृहीतैः शुचिकीर्त्तिनीरै-
रसिस्नपद्योऽम्बरमूर्त्तिमीशम् ॥ ३ ॥

सदा प्रसादोन्मुखवस्तुपाल-
दृग्पातपीयूषरसानुकारम् ।
अमुं प्रबन्धं प्रतिवादिदन्ति-
सिंहोऽरिसिंहो रचयाञ्चकार ॥ ४ ॥

प्रतिसर्गं प्रबन्धेऽस्मिन्नरिसिंहविनिर्मिते ।
इमान्यकृत चत्वारि काव्यान्यमरपण्डितः ॥ ५ ॥

इति श्रीसुकृतसङ्कीर्त्तननाम्नि महाकाव्ये चापोत्क-
टान्वयवर्णनो नामः प्रथमः सर्गः ॥ १ ॥

॥ अथ द्वितीयः सर्गः ॥

पदेऽथ तस्याजनि भागिनेय-
चौलुक्यवंशार्णवपूर्णचन्द्रः ।
श्रीमूलराजः प्रतिकूलराज-
समूलनिर्मूलनबद्धमूलः ॥ १ ॥
तथाऽस्य तेजोभिररातिजाति-
रवाप तापव्यसनं वनान्ते ।
यथा हिमाम्भःकणसङ्गमङ्गे
दवस्फुलिङ्गेषु लगत्सु मेने ॥ २ ॥
सुव्यक्तभक्तिः प्रतिसोमवारं
यः सोमनाथं प्रणिपत्य वीरः ।
तद्भालनेत्रानलचन्द्रभाभि-
र्बभार तेजश्च यशश्च पुष्टम् ॥ ३ ॥
सम्पूर्णशक्तित्रयसम्भवा यः
शम्भुत्रयीर्देवगृहच्छलेन ।
कीर्तिस्त्रिधा मूर्त्तिमतीः पताका-
हस्तैर्नटन्तीर्घटयाञ्चकार ॥ ४ ॥
विजित्य यः संयति कन्यकुब्ज-
महीभुजो बारपदण्डनाथम् ।
जहार हस्तिप्रकरं कराग्र-
सूत्कारसंदीपितपौरुषाग्निम् ॥ ५ ॥
न भूभृतः केऽपि यदग्रभागे

भेजुर्गुरुत्वं किल सापि मग्ना ।
अदृश्यता यत्तरवारिवारि-
६ निधौ दधौ कच्छपलक्षसेना ॥ ६ ॥
स्वर्गं जिगीषुश्चरणाग्रलग्न-
मर्ग्निं विधूय प्रबलप्रतापः ।
महो महीयानसहिष्णुरन्य-
द्विभेद भानोरपि मण्डलं यः ॥ ७ ॥
क्ष्माखण्डमाखण्डलचण्डशक्ति-
श्चामुण्डराजः प्रशशास तस्मात् ।
द्विषां मुखे क्रष्टुमभूनिवान्तः
कृतान्तबाहुर्यदसिर्विवेश ॥ ८ ॥
अजस्रमस्त्रैर्वनपादपानां
यस्यारिनारीभिरकारि सेकः ।
सान्द्रच्छदच्छायतया महान्त-
स्ताभ्योऽपि ते प्रत्युपकुर्वते स्म ॥ ९ ॥
तस्माद्भुजङ्गेन्द्रभुजो बभूव
भूवल्लभो वल्लभराजदेवः ।
यत्कीर्तिदासीकृतकौमुदीन्दु-
मुखीमुखेन्दौ विशदोऽयमङ्कः ॥ १० ॥
अटव्यटव्यां यदरातिवर्गो
दरातिरेकोज्झितराजलोकः ।

१ क-ख-रेको ।

रीणोऽप्यतिक्रम्य पराक्रमेण
हरीन्दरीर्मन्दिरयाञ्चकार ॥ ११ ॥
जटालमौलिर्मृगचर्मवासा
निःस्वः फलाशी वनमध्यवासी ।
अध्यायदुग्रं हृदि यं तपस्वी
सदापि रूपस्थमरातिभूपः ॥ १२ ॥
क्वचिन्न भङ्गोऽस्य भविष्यतीति
भाले लिपिं मालवभूमिभर्तुः ।
आरुह्य चूडामणिबिम्बदम्भा-
ल्लुलोप कोपी यदसिर्जलाढ्यः ॥ १३ ॥
ऊर्ध्वस्थितारातिचमूसमूह-
प्रच्छादनोच्छृङ्खलसैन्यरेणुः ।
यो धैर्यधुर्यो जगति द्वितीयां
दधौ जगज्झम्पन इत्यभिख्याम् ॥ १४ ॥
अभूदथ न्यायपरः परस्त्री-
सुदुर्लभो दुर्लभराजराजः ।
यः कृष्णसाम्ये कथितः कवीन्द्रै-
र्विचिन्त्य गोपीचरितं ललज्जे ॥ १५ ॥
तमीदिने व्यत्ययतो वितेनु-
र्यद्वैरिणः प्राप्य महीध्ररन्ध्रम् ।

१ ख-कथितै° । २ ख-महीन्द्र° ।

तदौषधीदीपितमाप्रदोपा-
त्तमिस्रमिश्रं पुनराप्रभावात् ॥ १६ ॥
अथावनीशोऽजनि शौर्यसीमा
भीमाभिधो येन युधि द्विषन्तः ।
श्रीभीम ! रक्षेति हरं स्मरन्तः
स्वध्यानबुद्धया मुदितेन मुक्ताः ॥ १७ ॥
वित्रस्यतो मालवभूमिभर्त्तु-
र्भ्रष्टेंऽशुके गुप्तधृतत्रपस्य ।
यत्सैन्यधूलीभिरदृश्यवक्रा-
म्भोजस्य भोजस्य हृदा न दीर्णम् ॥ १८ ॥
सर्वत्र सञ्चारिषु यच्चरेषु
चरन्नरण्येऽरिनरेन्द्रवर्गः ।
दरेण नश्यँल्लघुकन्दरेऽपि
गुणाय कार्श्यं गणयांबभूवे ॥ १९ ॥
श्रीकर्णदेवोऽस्य नृपस्त्रिलोक-
विलोकनीयद्युतिराशिरासीत् ।
यं वीक्ष्य नारीहृदयैकवासो-
धिकं ह्रियाभून्मदनोऽप्यनङ्गः ॥ २० ॥
पूजासु पाणिस्थितपुष्पमाल-
मालोकयन् यं पुरतः पुरारिः ।
क्रुद्धोऽपि पुष्पायुधयुद्धबुद्धया
भेजे भवानीहसितः प्रसत्तिम् ॥ २१ ॥

सम्पालयन्तो यदरीन् दरीपु
स्फुटं कुटुम्बित्वगतान् गिरीन्द्राः ।
अद्यापि दीप्तौषधिदीपदीप्ताः
क्षपां सशङ्काः क्षपयन्ति शङ्के ॥ २२ ॥
जित्वा बलैर्मालवभूमिपाल-
मानीतवान् यः किल नीलकण्ठम् ।
तन्मूर्ध्नि[1] सिन्धुप्रथिताध्वसंख्यं
प्रैषीद्यशः स्वं भुवनत्रयेऽपि ॥ २३ ॥
बभार भूभारमथो जयश्री-
निकेतनं श्रीजयसिंहदेवः ।
भाले रराज प्रतिराजकस्य
राज्यप्रतिष्ठातिलको यदङ्कः ॥ २४ ॥
यत्र क्षितिं रक्षति काङ्क्षति स्म
धारा न धाराधरधोरणीनाम् ।
न वैरिदृग्वारिनदीकदम्बै-
र्नदीनदीमातृक एव लोकः ॥ २५ ॥
उद्दामदानप्रसरस्य यस्य
लसद्यशोदुग्धपयोधिमध्ये ।
कल्पद्रुचिन्तामणिनामधेनु-
यशोभिरासाद्यत मौक्तिकत्वम् ॥ २६ ॥
सवार्द्धिमुर्वीमपि ये भुजेना-

1 ख–ग–मूर्नसि°।

न्वहं वहन्तः क्षितिपा न खिन्नाः ।
स्यालेशजैर्मूर्ध्नि घटैः क्व तेषां
खेदोऽस्तु यद्द्वारि सवारिलेशैः ॥ २७ ॥
युग्मेन यस्यासिलता प्रताप-
कीर्ती प्रसूयाऽस्मयत्कृतार्था ।
उच्चै रवीन्दुद्विककन्दुकश्री-
शिल्पे वलान्दोलिनि विश्वतल्पे ॥ २८ ॥
धृता चिरं या हृदये निरस्ता
सा कालिका यज्जनितप्रसत्त्या ।
विलग्नहिञ्जीरकिणच्छलेन
स्यातुं पपात द्विपतां पदेषु ॥ २९ ॥
यस्य द्विपां कण्टककूटकोटि-
क्षतानि कान्तारजुषां तनूषु ।
नव्यानि नित्यं भृगमापुराप-
न्नवाङ्गनासङ्गनखाङ्कशोभाम् ॥ ३० ॥
इष्टैः स्मृतैरप्यपरैः प्रकृष्टै-
ररक्षिता यस्य युधि क्षतेभ्यः ।
त्रस्ताः श्वसन्तो रिपवः समस्ता
व्यस्तारयन्नास्तिकदृष्टिसृष्टिम् ॥ ३१ ॥
अपि द्विपः प्रागकृतप्रहारा-
नभिन्दतामात्मचमूभटानाम् ।
स्पर्शेन पूतानपि यस्तुरङ्गान्

गङ्गाम्भसि क्षालयति स्म कीर्त्यै ॥ ३२ ॥
यः सञ्चरन्वैरिखेचरस्य
स्कन्धाधिरूढो रचयाञ्चकार ।
मुखश्रिया सेन्दु दिवापि देह-
द्योतेन दोषापि नभः सभानु ॥ ३३ ॥
यदीयकारागृहमाप्य धारा-
पतिर्यशोवर्मनृपः सिषेवे ।
कम्पैः सदा वाष्पपयोभिरुष्ण-
श्वासैश्च कालत्रयमेककालम् ॥ ३४ ॥
यत्कारितं सिद्धसरः सरस्व-
त्पातापि पातुं घटभूरशक्तः ।
न प्राप्यशोभङ्गभयादुपैति
च्छद्मैव विन्ध्याचलवृद्धिरक्षा ॥ ३५ ॥
श्रीसोमनाथोऽपि कृपैकपात्रं
यं मातृभक्त्यैकरुचिं विलोक्य ।
दक्षक्रतुब्रह्मशिरश्छिदादि-
पापोर्मिनिर्मुक्तममन्यत स्वम् ॥ ३६ ॥
विश्वं जगद्येन विजित्य कीर्ति-
स्तम्भस्तथा कोऽपि महानकारि ।
यथा हिमाद्रेरिव यस्य मूर्ध्नि
नभोनदी पैतुपदं प्रपेदे ॥ ३७ ॥
श्रीमाण्डवगुप्ताद्रिजनायकस्य

यशःकुमारस्य कथाप्रथाभिः ।
विलज्जितो यः सततं द्विजेन्द्र-
स्थानप्रदानव्यसनी नरेन्द्रः ॥ ३८ ॥

तन्वत्यथाहर्गमनं सुधार्भृ-[१]
क्षुधालिगोष्ठीरसवञ्चितेऽस्मिन् ।
कुमारपालः किल भूमिपालः
श्रियं मुमोष द्विषतां सरोषः ॥ ३९ ॥

हठाद्धरन्तं श्रियमब्जिनीनां
राजानमस्ते सति धामनाथे ।
यशोभटैर्यः प्रकटैन्र्यकार्षी-
दभर्तृकस्त्रीधनमुक्तिधन्यः ॥ ४० ॥

भृगोः सुतेनेव जिनस्य धर्म-
मुल्लास्य येन स्मितमार्गणेन ।
क्षतक्ष्माभृन्नववर्त्मनैव
हंसैरिवाशोभि जगद्यशोभिः ॥ ४१ ॥

सितांशुना कीर्त्तिविनिर्जितेन
ज्योत्स्नाततिर्ढौकनिकीकृतेव ।
न्यक्षेपि येनानुपुरं विहार-
च्छलेन हर्षैरवहर्षहेतुः ॥ ४२ ॥

युधि स्वयं यः किल जाङ्गलेशे
वली विजिग्ये किमु चित्रमत्र ।

---

१ क-ख-°भिर्सुधालि° ।

अनूपभूपो वणिजापि यस्य
यतो जितः कौङ्कणचक्रवर्ती ॥ ४३ ॥
अथोरुधामाऽजयदेवनामा
ररक्ष दक्षः क्षितिमक्षतौजाः ।
न केऽपि काराकुहरेऽप्यरण्य-
देशेऽपि नो यस्य ममुर्द्विषन्तः ॥ ४४ ॥
सपादलक्षप्रभुणा प्रदत्ता
रौक्मी बभौ मण्डपिका सभायाम् ।
सेवागतो मेरुरिव स्थिरत्व-
जितो भृशं यस्य कृशप्रतापः ॥ ४५ ॥
तदङ्गजो दिग्गजदन्तशय्या-
विश्रान्तकीर्तिः किल मूलराजः ।
तुरुष्कशीर्षाणि शिशुर्जयश्री-
लताफलानीव लसन्नगृह्णात् ॥ ४६ ॥
यस्मिन् सदोच्चैःशिरसि प्रतीची-
महीभृति स्फारबलाम्बुराशौ ।
अस्तं समस्तारियशःशशाङ्क-
प्रतापचण्डद्युतिमण्डलाभ्याम् ॥ ४७ ॥
श्रीभीमदेवोऽस्ति निरर्गलोग्र-
भुजार्गलग्रस्तसमस्तशत्रुः ।
बिभ्रत्करे भूवलयं पयोऽधि-
वेलामिलन्मौक्तिकमस्य बन्धुः ॥ ४८ ॥

आजन्मसद्म द्युसदां मदेक-
क्षणप्रदानात् क्षयमेष मा गात् ।
इति स्मरन् यः कनकानि दातु-
मुन्मूलयामास न हेमशैलम् ॥ ४९ ॥
यद्दानमश्रावि सदानुभूत-
मेवार्थिभिर्गीतिषु खेचरीणाम् ।
विलासहेमाद्रिषु मेरुपाद-
धियागतानां स्वगृहोपकण्ठे ॥ ५० ॥
सततविततदानक्षीणनिःशेषलक्ष्मी-
रितसितरुचिकीर्तिर्भीमभूमीभुजङ्गः ।
चलकवलितभूमीमण्डलो मण्डलेशै-
र्थिरमुपचितचिन्ताचान्तचिन्तान्तरोऽभूत् ॥५१॥
किञ्च—
स्वर्धेनुशाखिमणयः ! किमु यूयमेवं
लीनाः सुराचलशिलासु विसंस्थुलासु ।
भूमिं विभूषयत कोऽपि न याचते वः
श्रीवस्तुपालसचिवस्तु सनातनायुः ॥ १ ॥
श्रीवस्तुपालसचिवस्तुतिनित्यरक्तान्
पुंसस्तथाऽत्यजदकिञ्चनता विरक्ता ।
मन्दैव दैवचसापि यथा प्रयाति
न मालिवेश्मिकनिकेतमुखेऽपि तेषाम् ॥ २ ॥
श्रीवस्तुपालाभिधमन्त्रिभर्तु-

भूरब्दलेखेव तमालनीला ।
अभ्युल्लसन्ती जलराशिसीम्नि
रिपुप्रतापानलशान्तयेऽभूत् ॥ ३ ॥
एनं प्रबन्धमयमुद्धुरवादिवृन्द-
वक्त्रारविन्दरजनीरमणोऽरिसिंहः ।
श्रीवस्तुपालचरितामृतसिन्धुवीचि-
संवादवदूकमुचितं रचयाञ्चकार ॥ ४ ॥
प्रतिसर्गं प्रबन्धेऽस्मिन्नरिसिंहविनिर्मिते ।
इमान्यकृत चत्वारि काव्यान्यमरपण्डितः ॥ ५ ॥

इति सुकृतसंकीर्त्तननाम्नि महाकाव्ये चौलुक्या-
न्वयवर्णनो नाम द्वितीयः सर्गः ॥ २ ॥

॥ अथ तृतीयः सर्गः ॥

अथादर्शि निशाशेषे कृशाशेषविभूतिना ।
स्वप्ने कदापि भूपेन कोऽपि श्रीभासुरः सुरः ॥ १ ॥
धात्या धर्तुं न शक्योऽयमित्यङ्घ्रितलमीयुषः ।
वासुकेः फणवद्भिश्चन्नखरञ्जुपोऽङ्गुलीः ॥ २ ॥
हारान्तपद्मरागस्य प्रभारागमिवाहृतम् ।
अधः परिदधद्वासः कान्ताहक्कोणशोणरुक् ॥ ३ ॥
कराग्ररोपणान्नीतैरसमानैः समानताम् ।

उज्जितानूर्मिकारत्नैर्नखान् दधदधोमुखान् ॥ ४ ॥
सेवकेषु दृढद्वेषिजये (जयं) दातुमिवावहन् ।
सुरचापचयं दोर्भ्यां रत्नकङ्कणकान्तिजम् ॥ ५ ॥
प्रज्वलन्मणिकेयूरप्रभापूरच्छलादयम् ।
भुजोष्मार्चिष्मदुत्तालज्वालाजालमुदञ्चयन् ॥ ६ ॥
लावण्यामृतपूर्णास्यस्यन्दिबिन्दुकदम्बवत् ।
कलयन्नुरसि व्यक्तं हारमुक्ताकलापकम् ॥ ७ ॥
हृद्वर्तिनः प्रसादस्य प्रासादस्याद्भुतश्रियाम् ।
वैजयन्तीमिवाबिभ्रदास्ये शुभ्रां स्मितद्युतिम् ॥ ८ ॥
कपोलयोरिवामान्तीः कान्तीरावर्त्य पिण्डिताः ।
दधानः कर्णयोः स्वर्णकर्णिकायुगलच्छलात् ॥ ९ ॥
परितः स्फुरितज्योतिर्जटापटलपेशलम् ।
मौलौ नीलमणिं बिभ्रत्क्लेशवल्ल्यादिकन्दवत् ॥ १० ॥
विहरच्चिकुरज्योतिर्झलत्कारोर्मिकोमलाः ।
दधद्धम्मिल्लमाल्यान्तभ्रान्तभ्रमरधोरणीः ॥ ११ ॥
अथ पृथ्वीपतिं प्रीतिलताकन्दमिवात्मनः ।
वचनामृतवीचीभिर्देवोऽसावित्यसिञ्चत ॥ १२ ॥
राजा कुमारपालोऽर्हद्धर्मासस्वर्गवैभवः ।
प्राप्तः पितामहस्तेऽहं स्नेहं दुस्थे दधत्त्वयि ॥ १३ ॥
सदर्पमर्पयिष्यामि तवाहं राज्यवाहकम् ।
वत्स ! विद्योत्स्यसे तेन पवनेनेव पावकः ॥ १४ ॥
चुलुक्यकुलकान्तारगजः श्रीधवलाङ्गजः ।

रिपुसर्पसुपर्णोऽभूदर्णोराजमहीभुजः ॥ १५ ॥
यद्भयप्रभवस्वेदपयःपरिचयैरिव ।
राज्यश्रीलिपयो लुप्ता भालेषु प्रतिभूभृताम् ॥ १६ ॥
युधि व्यभासि यस्यासिर्जयश्रीनाटिकानटः ।
पारिपार्श्वकवत्पार्श्ववर्तिना समवर्तिना ॥ १७ ॥
मयासौ विक्रमाक्रीतमनसा घनसाहसः ।
अकारि कारणं श्रीणां भीमपल्लीपुरप्रभुः ॥ १८ ॥
दुष्टामात्यनिपिद्धस्य येनाकल्पि बलीयसा ।
राज्यं ते मत्प्रसादानामनृणीकारकारणम् ॥ १९ ॥
सुतस्तस्यास्ति लावण्यप्रसादो युधि यद्भुजः ।
असिं जिह्वामिवाकृष्य रिपुग्रासाय सर्पति ॥ २० ॥
युद्धमार्गेषु यस्यासिः प्रतापप्रसरोन्मलः ।
अतीवारियशोवारि पायं पायं न निर्ववौ ॥ २१ ॥
प्रतापतापिता यस्य निमज्ज्यासिजले द्विपः ।
भीताः शीतादिवासेदुः सद्यश्चण्डांशुमण्डलम् ॥ २२ ॥
सर्वेश्वरममुं कुर्वन्नुर्वीमण्डलमण्डनम् ।
भविष्यसि श्रियो भर्ता मुखाम्भोधिचतुर्भुजः ॥ २३ ॥
अस्यास्ति च सुतो वीरधवलः प्रधनाप यः ।
भार्गवस्य पुनः क्षत्रक्षयसन्धां समीहते ॥ २४ ॥
धुरमारोपितां यस्य युधि वीक्ष्याधिकांश्रियम् ।
भुवि भ्रष्टं द्विपां चापैः सज्जितैरपि लज्जितैः ॥ २५ ॥
यं विलोक्यातुलं विश्वे दानेन च बलेन च ।

पश्यत्युपेन्द्रमिन्द्रोऽपि श्वभ्रोत्थितनालिभ्रमात् ॥ २६ ॥
शिशुभूपशिरोरत्नीभूतक्रमनखत्विषे ।
दत्त्वास्मै दोष्मते यौवराज्यं राज्यं चिरं कुरु ॥ २७ ॥
किञ्च स्वःसीम्नि येनाद्यमनाहतगतिः कृतः ।
तं कथञ्चित्कलौ जैनं धर्मं मज्जन्तमुद्धर ॥ २८ ॥
इति श्रुत्वा नृपः स्मित्वा लग्नस्तत्पदपद्मयोः ।
ग्रहीतुमिव पाणिभ्यां पद्मवासामिव श्रियम् (?) ॥ २९ ॥
प्रसादमादरस्तस्य मूर्ध्नि देवोऽप्यधात्करम् ।
कमलं कमलागेहमिव स्नेहसंभवः ॥ ३० ॥
प्रातस्तूर्यस्वने सूर्योदयशंसिनि भूभुजः ।
निद्रा नेत्राब्जमुद्राकृदथ रात्रिरिवात्यजत् ॥ ३१ ॥
अथ विस्मितदृष्ट्या महीपो दीपदीधितिः ।
सासादैः स्निग्धलीनि मंक्षु पर्यङ्कमत्यजत् ॥ ३२ ॥
अथानणुमणिस्तम्भप्रभाविष्णुप्रभां सभाम् ।
अभजद्भुजगोऽप्येष कृतप्राभातिकक्रियः ॥ ३३ ॥
ततः क्षितिपतेरस्य प्रतापैरिव निर्जितः ।
आगत्य भानुरास्थानं भानुर्भूपमदीदृशत् ॥ ३४ ॥
स्फुरन्तः प्रतापाग्निस्फुलिङ्गा इव संसदि ।
दन्तलेखा व्यरोचन्त सेवावन्तः क्षितिक्षितः ॥ ३५ ॥

राजा दृग्भ्यां सुधाकुम्भसदृग्भ्यामभ्यसिञ्चत ।
देवादिष्टौ पितृसुतौ सर्वेश्वरपदे हृदा ॥ ३६ ॥
अभाषिष्ट सभाशिष्टसमक्षमथ पार्थिवः ।
प्रसादसान्द्रलावण्यप्रसादाय मुदा वचः ॥ ३७ ॥
अस्मिन् कृतोऽस्मि राज्ये त्वत्पित्रा वित्रासितद्विषा ।
विध्यायन्तीमिमां भूतिमुद्भावयतु तद्भवान् ॥ ३८ ॥
गृहाण विग्रहोदग्रसर्वेश्वरपदं मम ।
युवराजोऽस्तु मे वीरधवलो धवलो गुणैः ॥ ३९ ॥
प्रार्थितौ प्रार्थनीयेऽर्थे प्रार्थनीयेन भूभृता ।
देवादेशः प्रमाणं नौ तावूचतुरिदं मुदा ॥ ४० ॥
पाणी संपुट्य रुन्धानो लोलां भृङ्गीमिव श्रियम् ।
पुनर्व्यजिज्ञपद्वीरधवलो धरणीधवम् ॥ ४१ ॥
न मे स्वामिन्नमात्योऽस्ति यं विना विक्रमी हरिः ।
अब्दे शब्दोद्धुरे कुम्भिभ्रान्त्योत्प्लुत्य पतत्यधः ॥ ४२ ॥
दक्षः शस्त्रे च शास्त्रे च धने च प्रधने च यः ।
तममात्यं ममात्यन्तगुणप्रगुणमर्पय ॥ ४३ ॥
इति लक्ष्मीलतोल्लाससुधया तद्गिरा चिरम् ।
प्रीतः किञ्चिद्विचिन्त्यान्तर्जगाद जगतीपतिः ॥ ४४ ॥
पुरा प्राग्वाटवंशाग्रजाग्रत्कीर्त्तिलतातति‌ः ।
राज्येऽस्मिन्महसा चण्डश्चण्डपः सचिवोऽभवत् ॥ ४५ ॥
क्षीरोदसोदरो यस्य यशोराशिर्निशाकरम्

१. क-पुस्तके–सुधाकुण्ड°।

भ्रातृव्योऽयमिति स्वर्गिभुक्तिभीतमगोपयत् ॥ ४६ ॥
तद्भूश्चण्डप्रसादाख्यो दाक्षदाक्षिण्यभूरभूत् ।
गृह्णन्ति यद्गुणान् दक्षा लक्ष्यन्ते न च तेषु ते ॥ ४७ ॥
दासः कैलासभूमीभृज्जिष्णो भुजगेश्वरः ।
किङ्करः शङ्करोत्तंसशशी यद्यशसामभूत् ॥ ४८ ॥
कीर्त्तिकल्लोलितव्योमा सोमाख्यस्तत्सुतोऽजनि ।
२न्यतिष्ठन्नार्थिनो नार्था यस्मिन् यच्छति वाञ्छितम्॥४९॥
अस्यासीत्कोऽपि न स्वामी सिद्धाधिपतिना विना ।
विना जिनाधिपेनाभूद्यस्य देवोऽपि कोऽपि नो ॥ ५० ॥
तद्भूः कीर्तिभरैरश्वराजो विश्वमराजयत् ।
तीर्थयात्रा व्यधात्सप्त यः सप्तनरकच्छिदे ॥ ५१ ॥
त्रैलोक्यादुत्तमं वीक्ष्य यं मातापितृभक्तिभिः ।
भक्तये स्पृहयेन्मातापितृभ्यामात्मभूरपि ॥ ५२ ॥
आसीत्कुमारदेवीति प्रीतिभूरस्य वल्लभा ।
या जैनधर्मधुर्यापि गौरीवल्लभभक्तिभाक् ॥ ५३ ॥
तयोस्त्रयोऽभवन् पुत्रा रिपुत्रासकरौजसः ।
यत्कीर्त्तिभिर्द्वितीयेन त्रिस्रोताः समजन्यत ॥ ५४ ॥
प्रथमः प्रथितस्तेषां मल्लदेवो धियांनिधिः ।
स्वाराज्ये गुरुबुद्धीनां स्वराज्यमतनिष्ट यः ॥ ५५ ॥
धीमानास्तेऽनुजस्तस्य वस्तुपालः कलास्पदम् ।
१अनुजेनान्वहं तेजःपालेनाराधितक्रमः ॥ ५६ ॥

---

१ ख-ग-पुस्तके-दाक्षदा० । २. ग-पुस्तके-न्यतिष्ठन्नर्थिनो नार्था ।

इमौ ग्रन्थाब्धिमन्थानो पन्थानौ श्रीसमागमे ।
तुभ्यं समर्पयिष्यामि मन्त्रिणौ तौ तु मित्रयोः (?) ॥५७॥
इत्युक्त्वा मुदिते वीरधवलेऽसौ धराधवः ।
आहूय तौ स्वयं प्राह नमन्मौली सहोदरौ ॥ ५८ ॥
युवां नरेन्द्रव्यापारपारावारैकपारगौ ।
कुरुतां मन्त्रितां वीरधवलस्य मदाकृतेः ॥ ५९ ॥
युवाभ्यामेव नेत्राभ्यां चक्षुष्मानस्य विक्रमः ।
आलोक्यालोक्य निःशेषानपि द्विष्टान् पिनष्टु मे ॥ ६० ॥

किञ्च प्रपञ्चय तमेव युवां जिनेन्द्र–
धर्मं जिनेन्द्रपदपद्मयुगद्विरेफौ ।
स्वप्नावलोकितनृपालकुमारपाल–
संदिष्टमिष्टतममेतदवश्यकार्यम् ॥ ६१ ॥

आस्थानमण्डपशिरःप्रतिशब्ददम्भा–
त्केनाप्यदृष्टमरुतानुमतो हि तेन ।
शिक्षामिति क्षितिपतिः स तदा प्रदाय
वीराय वीरधवलाय मुदार्पयत्तौ ॥ ६२ ॥

किञ्च—

कल्पान्तेषु यशोभरे तव हरिर्दुग्धाब्धिवासस्मयं
मार्त्तण्डस्त्रिदिवापगारयपयःस्नानोत्सवं लप्स्यते ।
'मिथ्योक्तिः कवितेति नात्र वचसि श्रद्धास्ति चेत्तच्चिरं
नन्द श्रीस्तुतवस्तुपाल ! भवतु प्रत्यक्षमेतत्तव ॥१॥

सर्वविस्तुतिपरः परं परो

रक्षति क्षितिमिमामरातितः ।
वस्तुपालसचिवस्तु पालय-
स्येष देवगुरुवन्मनीषया ॥ २ ॥
संग्रामसिंहकुयशोभरभृङ्गभङ्गि-
भास्वद्यशःकुसुमसौरभसंभृताशः ।
वाग्वैभवेन किल कोकिलकोमलेन
शश्वद्वसन्त इव भासि वसन्तपाल ! ॥ ३ ॥
श्रीवस्तुपालस्य यशस्तरङ्ग-
पूरैः परीतं परितोऽरिसिंहः ।
व्यधत्त दुग्धाब्धिमिव प्रबन्ध-
ममुं समुद्भूतरसप्रशस्यम् ॥ ४ ॥
प्रतिसर्गं प्रबन्धेऽस्मिन्नरिसिंहविनिर्मिते ।
इमान्यकृत चत्वारि काव्यान्यमरपण्डितः ॥ ५ ॥
॥ इति सुकृतसंकीर्तननाम्नि महाकाव्ये मन्त्रिप्रकाशो नाम तृतीयः सर्गः ॥ ३ ॥

॥ अथ चतुर्थः सर्गः ॥

वस्तुपालसचिवेन्द्रधीमुषी-
सम्मुखः पुरुपर्णोरुपोदधिः ।
मेदिनीमजयदब्धिमेखला-

मेष वीरधवलोऽथ दुर्द्धरः ॥ १ ॥
तन्महामतिरकम्पसङ्कटे
कण्टकालिरहिते हितः सताम् ।
न्यायवर्त्मनि समे समन्ततः
सम्मदेन समचीचरत्प्रजाः ॥ २ ॥
कस्यचिद्धरणिमण्डलच्युते
कुण्डलेऽपि मणिराजिराजिते ।
शङ्कयेव भृशमाशुशुक्षणेः
कोऽपि न क्षिपति पाणिपङ्कजम् ॥ ३ ॥
ऋद्धिवृद्धिविशदेषु सर्वदा
देशवासिषु जनेषु मानिषु ।
दीयमानमपि नाददीत य-
स्कोऽपि तस्करकथा ततः कुतः ॥ ४ ॥
सर्वथाप्यसति याचके कचि-
त्कोऽपि किञ्चिदपि न प्रयच्छति ।
कौतुकात्कविभिरेव वर्ण्यते
दानवानिति महाधनो जनः ॥ ५ ॥
एतदाननविलासि पालय-
त्याशु वीरधवलादपि द्विषः ।
आप्तगौरवमिति च्युतं क्षिते-
र्नैव कश्चिदुदपाटयत्तृणम् ॥ ६ ॥
नित्यचैत्यकृतुकावलोकन-

त्सीम्नि वर्षति विशेषदर्पितः ॥ १२ ॥
इत्थमद्भुतविभूतिभूरभू-
देव ! देशजनता नयात्तव ।
जैनधर्मपरिवर्धनोचितं
तन्महीरमणशासनं स्मर ॥ १३ ॥
बान्धवस्य सुरसिन्धुबन्धुरां
भारतीमिति निशम्य संमदी ।
आह किंचन विचिन्त्य चातुरी-
रोचितः सचिवचक्रशेखरः ॥ १४ ॥
आत्मगोत्रगुरवः पुराऽभवन्
विश्रुता भुवि महेन्द्रसूरयः ।
यैः सिताम्बरवरैः सिताम्बरं
निर्ममे जगदमेयकीर्त्तिभिः ॥ १५ ॥
यैरजीयत जगत्रयीजयी
मन्मथोऽयमिदमद्भुतं न नः ।
यद्भुवापि यशसा यतो जितः
कामजिन्मुकुटकुट्टिमः शशी ॥ १६ ॥
शान्तिसूरिरथ तत्पदश्रियो-
लङ्कृतिः कृतिषु शेखरोऽभवत् ।
उद्गृणन्ति मरुतोऽपि यद्गुणान्
विस्मृतामृतरसा रसाधिकम् ॥ १७ ॥

न प्रवेष्टुमिह मन्मथो यथाऽ-
नङ्गतामपि गतः क्षमोऽभवत् ॥ २३ ॥
सन्ति संमति तदीयशासने
सूरयो विजयसेनसूरयः ।
उज्झितो जगति यैर्महास्त्रव-
न्मन्मथोऽपि भवभेदकोऽभवत् ॥ २४ ॥
सर्वतोमुखतपोहुताशनै-
र्यैर्हुतः स्मर इति क विस्मयः ।
निर्जितः पुरजिता पुरा यतो
नेत्रमात्रतुलिताग्निनापि सः ॥ २५ ॥
गम्यते तपनरम्यतेजस-
स्तस्य वन्दनविधित्सया गुरोः ।
देशनां समधिगम्य तन्मुखा-
द्धर्मकर्मणि निधीयते मनः ॥ २६ ॥
इत्युदीर्य मतिभासुरः पुर-
स्कृत्य कृत्यविदसौ सहोदरम् ।
कम्पयन् कलियुगं मनोरथै-
रास्रसाद वसतिं मुनीशितुः ॥ २७ ॥
द्वारमध्यमविशन्निषेधिका-
मुद्गिरन् गुरुमवेक्ष्य तत्पुरः ।
बाष्परुद्धनयनः पदे पदे
सम्मदेन घनगद्गदोऽस्खलत् ॥ २८ ॥

न प्रवेष्टुमिह मन्मथो यथाऽ-
नङ्गतामपि गतः क्षमोऽभवत् ॥ २३ ॥
सन्ति संप्रति तदीयशासने
सूरयो विजयसेनसूरयः ।
उज्झितो जगति यैर्महास्त्रव-
न्मन्मथोऽपि भवभेदकोऽभवत् ॥ २४ ॥
सर्वतोमुखतपोहुताशनै-
र्यैर्हुतः स्मर इति क विस्मयः ।
निर्जितः पुरजिता पुरा यतो
नेत्रमात्रतुलिताग्निनापि सः ॥ २५ ॥
गम्यते तपनरम्यतेजस-
स्तस्य वन्दनविधित्सया गुरोः ।
देशनां समधिगम्य तन्मुखा-
द्धर्मकर्मणि निधीयते मनः ॥ २६ ॥
इत्युदीर्य मतिभासुरः पुर-
स्कृत्य कृत्यविदसौ सहोदरम् ।
कम्पयन् कलियुगं मनोरथै-
राससाद वसतिं मुनीशितुः ॥ २७ ॥
द्वारमध्यमविशन्निषेधिका-
मुद्गिरन् गुरुमवेक्ष्य तत्पुरः ।
वाष्परुद्धनयनः पदे पदे
सम्मदेन घनगद्गदोऽस्खलत् ॥ २८ ॥

तां पुनर्विजयते प्रभावना
सा तु संपदि सुखेन साध्यते ॥ ३४ ॥
अस्थिराः करभिका इव श्रियः
पातयन्ति नरकावटे नरम् ।
कश्चिदेव निपुणं नियोजकं
लङ्घयन्ति विकटां भवाटवीम् ॥ ३५ ॥
श्रावकत्वममलं कुलं कला-
चक्रवालमपि कश्चिदुद्वहन् ।
संपदा ललनयेव लोलया
पीतमद्य इव मोह्यते जनः ॥ ३६ ॥
श्रीलता शुचितरेषु रोपिता
स्थानकेषु समये यथाविधि ।
पुष्पिताद्भुततरैर्यशोभरै-
राशु पुण्यफलहेतवे भवेत् ॥ ३७ ॥
न स्थिराः क्वचन यान्ति खण्डशः
संमिलन्ति रसवत्कथश्चन ।
संपदः प्रकटितप्रभावनाः
कस्यचिद्यदि भवन्ति सिद्धये ॥ ३८ ॥
पावयन्ति परिक्लृप्तभावना-
दानशीलतपसः स्वमेव तत् ।
विश्वशासनविकाशदीपिकां
व्यातनोति विरलः प्रभावनाम् ॥ ३९ ॥

किञ्च—

वितन्वाते विश्वाङ्गणसदसि यावत्तव यशः-
मतापाभ्यामभ्युल्लसितरुचिवादं विधुरवी ।
भज स्थैर्यं सोमान्वयतिलक ! तावत्क सुकृतैः
कृतैर्लभ्यः सभ्यस्त्वमिह गुणदोषैकनिकषः ॥ १ ॥

ईदृक्कश्चिद्विपश्चिज्जनमनसि चमत्कारकारी पुरापि
क्कापि प्रापि प्रबुद्धे वसुमति सुमतिर्वस्तुपालस्य तुल्यः ।
येन क्षीरार्णवार्णश्चयसिचयजुपः सिद्धसिन्धूत्तरीय-
श्रीविस्तारोत्तराया व्यरचि शुभरुचिः कीर्तिभिः कञ्चुकस्ते

सच्चकनन्दकपुरोगदयाद्भुतश्री-
स्त्वं वस्तुपाल ! पुरुषोत्तम ! जिष्णुरेव ।
तद्भूयते तु हृदि मेऽन्वहमेव शङ्को
यत्सिन्धुराजतनुभूर्न करे गृहीतः ॥ ३ ॥

कविर्न को निस्तुषवस्तुपाल-
यशःसुधाविद्धरसं रसज्ञः ।
प्रबन्धमास्वादयतेऽरिसिंह-
मुखारविन्दैकमरन्दमेनम् ॥ ४

प्रतिसर्गं प्रबन्धेऽस्मिन्नरिसिंहविनिर्मिते ।
इमान्यकृत चत्वारि काव्यान्यमरपण्डितः ॥ ५ ॥

॥ इति सुकृतसंकीर्त्तननाम्नि महाकाव्ये धर्मोपदेशनो नाम चतुर्थः सर्गः ॥ ४ ॥

---

१ ख–°ल्लसितरुचिविवाद ।

॥ अथ पञ्चमः सर्गः ॥

स तीर्थयात्रासुमनोमनोरथं
प्रकाशयन् संमदमेदुरोद्यमः ।
पुरे पुरे श्राद्धजनाय नायको
विवेकभाजां लिखितान्यलीलिखत् ॥ १ ॥

अवाहनानामपि वाहनावली-
मशम्बलानामपि शम्बलं बली ।
अविद्धराणामपि विद्धरान् कृती
वितीर्य सङ्घे समवीविशद्बहून् ॥ २ ॥

अटोपरीयात्रिपनिस्तटोपरी-
रसीमिरद्धिर्भगजां गिरिश्वराः ।
बभूव नाभिर्भुवनाधिपाधिपतिः
स यामुदीशोमनःकीर्तिकारणम् ॥ ३ ॥

इंधन वैधानननर्थवभरान
समं स मन्त्री जगृहे महेच्छया ।
नभूष्णुमद्गुणमरेणुगाशिनं
तदाविन्न्याधिदरं नमोऽपि यत् ॥ ४ ॥

न यद्यपि श्रीदृष्टपसभावनो
भविष्यति स्पष्टमनोभिदा क्वचित् ।
परोपकाराय तथाप्ययं कृती
पुराणिमर्वरञ्जनाद्रतोऽभवत् ॥ ५ ॥

अथासितीव्रव्रतनिर्जितान्तर-
द्विपो भवाम्भोनिधिकुम्भसंभवान् ।
मठेषु गत्वा स्वयमद्भुतादरः
समं शमीन्द्रान् समवाहयत्कृती ॥ ६ ॥
सतां पतिः सङ्घपतित्वरोपणा-
भिषेकमासाद्य गुरोः कराम्बुजात् ।
शुभे मुहूर्तेऽद्भुतवाहवाहिनी-
वृतोऽचलच्चन्दनचर्चिताकृतिः ॥ ७ ॥
ततश्चतुर्विंशतितीर्थकृत्कला-
कलादितीर्थङ्करदेवतालयः ।
चचाल नृत्यादिविनोदतत्परः
प्रजामुदश्रुस्नपितेन वर्त्मना ॥ ८ ॥
पिबन्पयः स्वःसरितो वियद्वने
शशाङ्ककान्तीस्तृणुते तृणोपमाः ।
विशृङ्खलो यस्य यशःकिशोरकः
समं त्रिगोत्रैकगुरुस्ततोऽचलत् ॥ ९ ॥
अथानुचेलुर्नरचन्द्रसूरयो
लसत्त्रसस्तोमविलोकनच्छलात् ।
दृशैव सिञ्चन्त इवाद्भुतक्रमां
प्रयाति सङ्घे वसुधां सुधान्तया ॥ १० ॥
अथाचलन् वायटगच्छवत्सलाः
कलास्पदं श्रीजिनदत्तसूरयः ।

निराकृतश्रीषु न येषु मन्मथः
चकार केलिं जननीविरोधतः ॥ ११ ॥
भवाभिभूतेन मनोभुवा भया-
. दनीक्षितैः क्लृप्तभवाभिभूतिभिः ।
अचालि सण्डेरकगच्छसूरिभिः
प्रशान्तसूरैरथ शान्तिसूरिभिः ॥ १२ ॥
शरीरभासेव पराभवं स्मरः
स्मरन्ननश्यत्किल यस्य दूरतः ।
स वर्द्धमानाभिधसूरिशेखर-
स्ततोऽचलद्वल्लकलोकभास्करः ॥ १३ ॥
सहस्रशीर्षोरगकल्पकीर्त्तयः
सहस्रधामप्रतिमानतेजसः ।
सहस्रनेत्रप्रमुखामरस्तुताः
सहस्रशोऽन्येऽपि च सूरयोऽचलन् ॥ १४ ॥
चतुर्दिगापूरणभूरिनिस्वन-
श्चतुःसमुद्रान्तमहीतलागतः ।
ततश्चतुर्थव्रतनिश्चलोऽचल-
चतुर्विधः सङ्घजनो यथाविधि ॥ १५ ॥
.वितन्वतः कासहृदाख्यपत्तने
महोत्सवं नाभितनूजसद्मनि ।
सहायतां मत्यमृणोन्महामते-
रमुष्य दृग्वर्त्मनि देवताम्बिका ॥ १६ ॥

अथास्य सङ्घस्य विसर्पतोऽग्रतः
शताङ्गचक्रोचितचीत्कृतस्वनः ।
नदन्महोक्षध्वनिवार्मितोऽपि सन्
हयालिहेषाभिरलाभि लाघवम् ॥ १७ ॥
पवित्रमेतत्तिलकाय नित्यशः
परस्परस्पर्द्धिभिरूर्ध्वमुत्सुकैः ।
तदा सदारैः समवापि दैवतैः
मुदैव तैः सङ्घविहारजं रजः ॥ १८ ॥
अभूत्तदा सङ्घपदाभिपङ्कत-
स्तथा कथञ्चिद्विरजस्तमा मही ।
यथाधिरूढापि शिरस्यहीशितु-
श्चकार नो भारमुदारविग्रहा ॥ १९ ॥
विभेद्य लोभेन धवान् धवान्तरै-
र्यया प्रपेदे प्रतिघातपातकम् ।
पवित्रिता सङ्घपदैर्दिवं ययौ
मही स्वदेहेन रजोमयेन सा ॥ २० ॥
महानयं सङ्घजनोऽचलत्कथं
धरिष्यथ क्ष्मामिति जल्पितुं तदा ।
गतैः समीपं किल रेणुभिः ककु-
प्करेणुभिर्मङ्क्षु मदो निराकृतः ॥ २१ ॥
रजस्तदा विस्तृतसङ्घसंभवं
नभोनदीतीरगनीरगर्भितम् ।

इहापि गङ्गामृदलाभि दुर्लभे-
स्त्यकर्पि सप्तर्षिभिराशु हर्षिभिः ॥ २२ ॥
द्विजेश्वरश्रीहृतिपातकादिव
द्रुतं दिवः पातिभिरर्कभानुभिः ।
पवित्रसङ्घक्रमरेणुसङ्गमा-
दसङ्गमूर्ध्वेव गतिः स्म तन्यते ॥ २३ ॥
विसर्पता सङ्घजनेन मेदिनी
पवित्रिता मत्युपकारिणी ततः ।
उदस्य धूलीस्तपनातपं व्यधाद्
व्यधाच्च तूर्णं सुतरास्तरङ्गिणीः ॥ २४ ॥
चलाचलायां भुवि सङ्घसङ्गमा-
त्तदा तरन्त्यामिव धर्मवारिधौ ।
जगद्धरोऽस्माकमवातरत्तरा-
मिति स्म नृत्यन्ति मुदा महीभृतः ॥ २५ ॥
अथायशल्यानि निरासितुं रया-
दनेन सङ्घेन परोपकारिणा ।
शताङ्गचक्रप्रथिलीलयावनि-
र्विदार्यमाणा सरवं व्यकम्पत ॥ २६ ॥
अमुष्य सङ्घस्य विलङ्घनक्रियां
वितन्वतोऽपि क्रमगौचकर्मठः ।
स्फुटस्फुरत्फेननिभेन भेजिवान्
शुचीनि पुण्यानि तरङ्गिणीगणः ॥ २७ ॥

क्रमक्रमस्थापितवारिशर्करा-
करम्बवालुङ्कविभूपितमपः ।
स्थितं गृहक्रोड इव प्रमोदिनं
निनाय मन्त्री जनमित्थमध्वनि ॥ २८ ॥
सृजन् जनः पूजनमुत्सवोत्सुकः
पुरे पुरे तीर्थकृतां कृताञ्जलिः ।
अलं व्यलङ्घिष्ट महीं महीयसी-
मसीमसंभावितभावनाद्भुतः ॥ २९ ॥
समीपसंकेतनिकेतनं शिव-
श्रियो वियन्मानसमुन्नतं ततः ।
पुरः पुरं धर्मनृपस्य पश्यति
स्मितः स शत्रुञ्जयपर्वतं जनः ॥ ३० ॥
अगण्यपुण्यैर्भवसिन्धुपारभू-
रभूदयं लोचनगोचरो गिरिः ।
इति स्मयस्मेरहृदो विदस्तदा
ससंमदाश्रुःरहो ! महोत्सवम् ॥ ३१ ॥
गतोऽग्रतोऽस्मिन् दुरितैरनाविलो
विलोक्य नाभेयनिकेतकेतनम् ।
जनस्तदा शर्मरसोर्मिविह्वलो
मदाम्र किं किं रचयाश्चकार सः ॥ ३२ ॥
ननर्त कश्चित्पृथुसम्मदस्तदा
सलीललोलायितपाणिपल्लवः ।

प्रतिप्रतीकं परितः कुतूहला-
दलं यथालोकयत पुण्यसंपदा ॥ ३३ ।
वहृत्पतत्पादयुगस्तदापरो
ननर्त दूरमसरत्करच्छदः ।
विधातुमुड्डीय नगाधिरोहणं
मनोरथी पत्ररथीभवन्निव ॥ ३४ ॥
भवभ्रमिश्रान्ततरः शिरोधराऽ-
धिरोपितं पापभरं त्यजन्निव ।
इलामिलन्मौलिरमन्दसम्मदो
ननाम विश्रामविधित्सया परः ॥ ३५ ॥
विलोकयन् कोऽपि नृपध्वजध्वजं
मुहुर्मुहुर्मङ्क्षु नमन्नमन्दधीः ।
उदञ्चितन्यञ्चितमौलिलीलया
रराज मुक्तिश्रियमाह्वयन्निव ॥ ३६ ॥
अमुत्र शत्रुञ्जयशैलसन्निधौ
भवार्णवस्येव तटे तदा परः ।
निरीयितुं पातकजातकर्दमा-
ल्लुलोठ सर्वाङ्गमुदारधीर्मुदा ॥ ३७ ॥
समुद्भवद्भावरसादचेतन-
श्चिराय नृत्यादिविवेकवर्जितः ।
परः शिलापुत्रसमोऽपि बाष्पवा-
नमोचि रिष्टैरपि रिष्टशङ्कितैः ॥ ३८ ॥

इहाथ पाथस्तृणराजिराजिते
जितेन्द्रियो मन्त्रिपतिर्महीतले ।
श्रमापनोदार्थमदापयत्तदा
निवासमासन्नममुष्य भूभृतः ॥ ३९ ॥
अथाव्रजत्खिन्नजलप्रमोदिनो
दिनोपतापे सचिवः स किङ्करान् ।
मरुत्त्वरान् प्रैषयदेष तत्क्षणं
शिखिच्छदच्छत्रविडम्बिताम्बुदान् ॥ ४० ॥
सुवंशसंयोजितरूपशोभिता
विचित्रिता धातुरसेन सर्वतः ।
पदे पदे पर्वतपादसोदरा
वितेनिरे पीवरचीवरालयाः ॥ ४१ ॥
अनांसि धर्मक्षितिपस्य वमव-
त्पदे पदे मण्डलितानि रेजिरे ।
तृणं क्षिपत्पापमिवोदमूलयन्
यतो विनिस्सृत्य वृपा भटा इव ॥ ४२ ॥
गिरौ गतिं पश्यत नः कुतूहला-
त्कथं वृथा मुञ्चत भूतले समे ।
इतीव चाटूक्तिकृतस्तृणं मुखे
वृपा व्यधुर्वभ्रति सारथौ पुरः ॥ ४३ ॥
नयेन[1] सङ्घस्य रसातलं यया

१ क-ख-पुस्तके ४४ तम का०। नास्ति ।

कथं समाकृष्यत सापि भिन्मदे (?)।
नवीनचुल्लीविवरापदेशतः
खनन्ति भूखण्डमिति स्म किङ्कराः ॥ ४४ ॥
प्रवृत्तनृत्ताः [1]प्रचलोर्मिपाणिभिः
प्रणीतगीताः कमलास्यपट्पदैः ।
तदा व्यधुः स्वागतमागते जने
विदम्भमम्भःप्रसरेण सिन्धवः ॥ ४५ ॥
तदान्नपाकाय विकाशितः शिखी
ज्वलन् बभौ सद्मजने निवासिनि ।
भरानमद्भूमिभिदा स्फुटस्फुर-
त्फणीन्द्रचूडामणिरश्मिराशिवत् ॥ ४६ ॥
अथैप तीर्थङ्करदेवतालय-
प्रक्लृप्तमध्यंदिनपूजनो जनः ।
मुदा नमस्कृत्य गुरुक्रमद्वयं
प्रचक्रमे शाश्वतकृत्यकेलिषु ॥ ४७ ॥
अदायि दीनाय तदा धनं तथा
मनोरथातीतमनेन मन्त्रिणा ।
यथा परे निश्चयदायिनो जना
वनीपकानामपि चाटु चक्रिरे ॥ ४८ ॥
स्वयं स कस्मैचन मोदकादिकं
घृतादि कस्मैचन शुद्धवासनः ।

१ ग-प्रवलो°।

फलादि कस्मैचन साधवे दद-
त्तदा विशश्राम न मन्त्रिशेखरः ॥ ४९ ॥
अकिञ्चनः कश्चन याचते कचि-
त्किमप्यहो शब्दमिति प्रदाप्य सः।
चकार भोज्यादिकमात्मना कृती
तृतीययामक्षणपूरितेक्षणः ॥ ५० ॥
अथ कृततनुकृत्यः कौतुकोत्तानचेता
जिनपदमनुसङ्गः क्लृप्तसङ्गहमागात्।
इह महमहिमांशुर्द्रष्टुकामो निकामं
गगनगमनखिन्नः प्रत्यगद्रौ निषण्णः ॥ ५१ ॥

किञ्च—

पायं पायमहर्निशं रिपुयशःपीयूषपूरं भवान्
कल्पायुः क्षितिकल्पवृक्ष! भवताल्लक्ष्मीलतालिङ्गितः।
श्रीसोमान्वयसोममौक्तिकमयैरेव प्रसूनैरिव
त्वत्कीर्त्तिप्रकरैरपि त्रिभुवनं सौरभ्यमभ्यस्यतु ॥ १ ॥
मात्यमात्यवर! नाम्बरे यशः
श्रीवसन्त! तव संततस्मितम्।
इत्यनन्यमहिमानमानशे
मानसाश्रयमहो! महीयसाम् ॥ २ ॥
सम्मुच्छ्रिताभिः खलु वस्तुपाल-
प्रतापदीपाञ्जनमञ्जरीभिः।

१ ग–समुत्थि॰।

इहोपकण्ठस्थितिभाजि शङ्खे
मालिन्यमुन्मीलितमुज्ज्वलेऽपि ॥ ३ ॥
श्रीवस्तुपालप्रथितप्रसादा-
दासन् प्रमोदामृतवारयो याः ।
एतत्प्रबन्धच्छलतोऽरिसिंह-
स्ता एव मूर्त्ताः स्तबकीचकार ॥ ४ ॥
प्रतिसर्गं प्रबन्धेऽस्मिन्नरिसिंहविनिर्मिते ।
इमान्यकृत चत्वारि काव्यान्यमरपण्डितः ॥ ५ ॥
॥ इति सुकृतसंकीर्त्तननाम्नि महाकाव्ये सङ्घप्रस्थाा-
नो नाम पञ्चमः सर्गः ॥ ५ ॥



॥ अथ षष्ठः सर्गः ॥



जिनमहमहिमानं प्रत्यदीयन्त दूरा-
दथ वलयितवृन्दं रासकाः श्राविकाभिः ।
तनुसदननिषण्णक्रूरकाकोलकाल-
स्फुरितदुरितजालत्रासकृत्तारतालम् ॥ १ ॥
करकिशलयलीलालोलतालप्रणादो-
ल्लसितलयविनोदानन्दनिर्मग्नचित्तः ।
जिनवदनविलोकव्यग्रदृग्भाविलोकः
प्रतिपदमभिरामं गीतमङ्गीचकार ॥ २ ॥
गतमदनमदानां भाविनामत्र भावा-

न्तरितरसतरङ्गैरङ्ग ! चित्तं हरन्ती ।
लयविलुलितहारैरङ्गहारैर्मृदङ्ग-
ध्वनिजनितविनोदं नर्तकी नृत्यति स्म ॥ ३ ॥
अशिथिलपदपातं प्रीतिपूर्णे जनेऽस्मिन्
नटति झटिति भेजे भूरियं भूरिकम्पम् ।
शिथिलकरकदम्बः प्रत्यगद्रेः पतित्वा
तदिव दिवसनाथः सिन्धुपाथस्यमज्जत् ॥ ४ ॥
पतितवति पतङ्गे रङ्गदुत्तुङ्गताप-
व्यतिकरकृति सद्यः प्रीतिहृद्या इवाशाः ।
तुहिनमहसि कामं रन्तुमागन्तुकामे
खगकुलतुमुलेन भ्रेजिरे कौतुकिन्यः ॥ ५ ॥
हरगलगरलाभं व्योम्नि काष्ठान्तराल-
ज्वलदविरलसन्ध्यावह्निविध्यानहेतुः ।
शबलममलरत्नैरुत्पपाताकतापा-
ज्जलमिव जलराशेरन्धकारं सतारम् ॥ ६ ॥
विषमलिमिषमास्ये न्यस्य मूर्च्छामगच्छ-
न्परिमिलितदलालीचक्षुषः पद्मखण्डाः ।
प्रियसुहृदि गतेऽस्तं भास्वति ब्रह्मचर्य-
व्रतमविरलशोकः कोकलोकश्च भेजे ॥ ७ ॥
स्वदिवसपरिशिष्टचिन्तानतः क्वापि यातः
प्रसरति रिपुरूपे ध्वान्तपूरेऽपि शूरः ।
अथ गुरुगिरिदुर्गान्निाप्य भासस्तदीया

दिशि विदिशि ववन्धुर्बन्धुतामोपधीभिः ॥ ८ ॥

अतुहिनमहसेव स्वैरवरमरोहा-
दपरगिरिगरीयःकुञ्जगुप्तेन मुक्ताः ।
अहह दहनदीप्ता दीपदम्भेन भेजु-
र्दिशि दिशि तिमिरौघं भङ्ग्यः शङ्कयन्त्यः ॥९॥

प्रथमसमुदितेन्दुज्योतिपूर्णेयमुद्घा-
टितविकटकपाटद्वारवत्पूर्वकाष्ठा ।
मुदमतनुत साक्षादन्धकारान्धकारा-
गृहकुहरगतस्यामुष्य विश्वस्य मुक्त्यै ॥ १० ॥

द्युमणिमणिगणैर्यत्किञ्चिदप्यङ्किवह्नि-
द्युतिततिभिरदाहि क्ष्मारुहादि क्षणेन ।
इह तदपि तदानीं जीव्यते स्म त्रियामा-
रमणमणिसुधाभिः सर्वतः पर्वतेषु ॥ ११ ॥

अहनि दहनकीलाभैरवैः कैरविण्य-
स्तरणिकिरणजालैर्मूर्च्छितातुच्छमूर्च्छाः ।
विधुरुचिमधुसेकम्छेकलोलालिवाल-
व्यजनपवनलीलावीजनैरप्यजीवन् ॥ १२ ॥

समदमदनभूभृन्नव्यमाचिन्त्यलक्ष्मि-
मगुणितगुणमौघैर्नन्दनं चन्द्रमेनम् ।
तरलतरतरङ्गोत्तुङ्गतुङ्गबाहुः
परिचितपरिरम्भारम्भमभ्युत्पपात ॥ १३ ॥

चडुगणमिपमुक्तव्यक्तमुक्ताकलापं

गजदनुजमिवेन्दुर्ध्वान्तमुच्छिद्य सद्यः ।
हृदि तदजिनखण्डं लक्ष्मलक्षेण बिभ्र-
द्व्यहरत हरमूर्तिर्मूर्ध्नि धात्रीधरस्य ॥ १४ ॥
भृशमुरसि कलङ्कच्छद्मना कालचित्रो-
पधिमधित निबद्धामोषधीनामधीशः ।
अपि पिबति चकोरी चक्रवाले कराले
तदिव न दिवि नेशुर्भासुरास्तस्य भासः ॥१५॥
विरहिशिखिसमीरः कामनासीरवीर-
स्तिमिरतरुकुठारः पूर्वदिक्तारहारः ।
गगनगजनिषादी कामिनीचक्रवादी
सितरुचिरुदितोऽयं वर्धयन् वार्धितोयम् ॥ १६ ॥
इभकुलमिभमल्लोद्भासि कैलासशैला-
कृतिमकृत नगौघं शेषवच्छेषसर्पान् ।
रुचिरमृतमरीचेः सङ्घभर्तुर्यशःश्री-
रिव धवलितविश्वा जाह्नवीं निह्नुवाना ॥१७॥
वियदहनि वितेने स्वस्य विश्वस्य सङ्घ-
क्रमसमुदितधूलीमण्डलैर्मण्डनं यत् ।
सुकृतमिदमिदानीं मूर्तमभ्युद्यदिन्दु-
द्युतिनिभमिति लेभे भिन्नमालिन्यमालम् ॥ १८॥
चिरमुपचितदर्पः सङ्घलोकालोका-
दिव कृतसुकृतोऽयं व्योमचूडावलम्बी ।
सहजनिजकलङ्कन्यक्कृतिभ्राजमाना-

कृतिरकृत न केषां विस्मयं शीतरश्मिः ॥ १९ ॥
निशि नियतमियत्यामप्यमुं सङ्घलोकं
कृतमहमिह भक्त्या जागरूकं विलोक्य ।
इयमधुनुत मौलिं विस्मिता व्योमलक्ष्मीः
कुसुममिव तदास्मान्मन्दमभ्रश्यदिन्दुः ॥ २० ॥
गिरिशिरसि जिनेशं नन्तुकामस्य मा स्या-
न्महमहह महत्त्वादस्य यात्रान्तरायः ।
इति विसृमरभावभ्राजमानक्षणस्य
क्षणमपि न तमिस्रा सङ्घलोकस्य जाता ॥ २१ ॥
चलितसकलतारालोकमामुक्तसन्ध्या-
दहनमिह विहायोमण्डलं द्राग्विहाय ।
सहजमहसि सूरे हन्तुमागन्तुकामे
परमपरमहीभृद्दुर्गमिन्दुर्गतोऽयम् ॥ २२ ॥
सजलजलदचारुर्वारुणीरागभाजः
क्षितितललुठितस्यामुष्य मुक्ताम्बरस्य ।
स्मरतिमिरवेषो यज्वनां भर्तुरेष
त्रिभुवनभुवनान्तर्दुर्यशोराशिरासीत् ॥ २३ ॥
स्फुटघटितकलङ्को यज्वनामेष भर्ता
त्यजति करगृहीतामप्युषां भूरिभुक्ताम् ।
इति वत कुमुदिन्यः सारसौरभ्यलोभा-
गतमधुपधवेषु व्यादधुर्वन्ध्यसन्धाम् ॥ २४ ॥
हरिहरिति रथाङ्गानल्पसंकल्पकल्प-

द्रुम इव दिवसेऽस्मिन्नुद्रमारम्भभाजि ।
जलधिसविधगुप्तादंशुमद्विम्बवीजा-
दुदयत मृदुतेजःकैतवादङ्कुरोऽयम् ॥ २५ ॥
पतितवति पयोधेरन्तरा हन्त रात्रि-
प्रिययुवतिविभेदाद्दुःखभाजि द्विजेन्द्रे ।
द्विजततिरतितारं निर्ममे तारकाणां
पथि कलकलमुच्चैरुच्चरन्ती चिराय ॥ २६ ॥
भृशमुपसि तुपारस्यन्दसंकाशतारा-
वलिवलयितनीलध्वान्तदूर्वावणौघः ।
गगनपथविहारोच्छृङ्खलैरस्खलद्भि-
स्तरणिकरकिशोरैर्जग्रसे मुक्तमुच्चैः ॥ २७ ॥
भुजगजगति भूर्ति (१) भोगिचूडामणीनां
भुवि भवनमणीनामम्बरे तारकाणाम् ।
सपदि विपदमेता निन्यिरे भूर्भुवःस्व-
स्त्रयविवरविलासव्यापृता भानुभासः ॥ २८ ॥
मसृणघुसृणकल्पश्चन्द्रलेखानुकारी
तिलक इव समुद्यन्याग्दिशः सूर्यलेशः ।
अयमभजत जम्भारातिकुम्भीन्द्रकुम्भ-
स्थलविलुलितलीलाशातकुम्भाङ्कुशाभाम् ॥२९॥
जलनिधिजलमध्यात्तुङ्गशैलाग्रजाग्र-

१ ग-भूर्तिर्भो (?)

त्करपरिचयशक्त्या भानुरभ्युज्जगाम ।
सपदि विपदपेतं कान्तमेनं विलोक्य
प्रहसितमुखपद्मा पद्मिनी नृत्यति स्म ॥ ३० ॥
अवतमसततीनां मृत्युकालोऽपमृत्युः
कुवलयवलयानां जीवितं पङ्कजिन्याः ।
अलमकृत नभोऽङ्क कोकलोकस्य सीता-
विरहितहरिशापानुग्रहोऽयं ग्रहेशः ॥ ३१ ॥
दयितमिति पुरस्ताद्वीक्ष्य भानुं युवानं
हरिहरिति हरिद्रारागमागःप्रकोपात् ।
स्फुटकमलमुखेभ्योऽमोचि निःश्वासधूमा-
वलिरलिनिकुरम्बच्छद्मना पद्मिनीभिः ॥ ३२ ॥
अजनि गिरिनितम्बे बिम्बमर्कस्य धातु-
च्छुरितमिव सरागं सूर्यकान्ताश्रितस्तम् ।
करजलपरिधौतं चुम्बितं चाम्बरेण
क्षणघटितसुवर्णादर्शवद्दिग्वधूनाम् ॥ ३३ ॥
समममसमयूखैर्भानुमन्तं लसन्तं
गिरिशिरसि विलोक्यालोकनीयमभावम् ।
स इव सचिवभर्त्ता सङ्घलोकेन सार्कं
विमलगिरिशिरोऽग्रं गन्तुमभ्युत्सुकोऽभूत् ॥ ३४ ॥
सद्यो जिनक्रमनमस्कृतिलोलसङ्घ-
सङ्घट्टलोलवसुधातलसंभ्रमेण ।
श्रीवस्तुपालगुणहृष्ट इवाचलोऽपि

शत्रुञ्जयः स्वयमकम्पयदेष मौलिम् ॥ ३५ ॥

किञ्च—

नित्यं त्वद्वदनारविन्दसदनं वाग्देवता सेवते
त्वं पद्माश्रयभासुरोऽसि जयति त्रैलोक्यसूत्रं त्वयि ।
श्रीमच्चण्डपगोत्रमण्डन ! गुणैरेभिर्भवान् ब्रह्मणः
साधर्म्यं वहति प्रियंवद! मदाशीर्भिस्त्वदायुर्भव॥१॥

अलभत वत यस्मिन् सान्द्रदारिद्र्यपूर्णे
गृहपतिरवकाशं न प्रदोषक्षणेऽपि ।
वितरति सति वित्तं वस्तुपाले कवीना-
मिह गृहकुहरान्तर्नैष रत्नाकुलेऽपि ॥ २ ॥

श्रीमन्त्रीश्वरवस्तुपाल ! भुजयोर्युग्मेन युद्धार्णवं
तूर्णं निस्तरतोऽपि ते समभवन्न व्याकुलत्वं किल ।
यद्दूरादवगण्य निर्मलगुणं शङ्कं त्वया मौक्तिक-
स्तोमानामिव धैर्यधुर्ययशसां चक्रे महान् संग्रहः ॥ ३ ॥

श्रीवस्तुपालसचिवेन्द्रयशःप्रसून-
माल्येऽरिसिंहकविना गुणगुम्फितेऽस्मिन् ।
कण्ठे सतां लुठति निर्मदुर्जनाली-
चक्रप्रभाः कति न बिभ्रति भृङ्गभावम् ॥ ४ ॥

प्रतिसर्गं प्रबन्धेऽस्मिन्नरिसिंहविनिर्मिते ।
इमान्यकृत चत्वारि काव्यान्यमरपण्डितः ॥ ५ ॥

॥ इति सुकृतसंकीर्त्तननाम्नि महाकाव्ये सूर्योदय-
वर्णनो नाम षष्ठः सर्गः ॥ ६ ॥

॥ अथ सप्तमः सर्गः ॥

शैलमौलिगमनाय मनोऽथै-
भ्राजमानमसमानविहारैः ।
प्रापदस्खलितमप्यसमेषु
द्राग्मनोरथरयं पथि सङ्घः ॥ १

भूरियातुमयजङ्गमशृङ्ग-
श्रेणिवद्विविधचारविचित्रः ।
मन्दमन्दमथ सङ्घजनोऽसौ
संचचाल गिरिराजतटेषु ॥ २ ॥

मञ्जुलः कनककुण्डलकान्तैः
स्त्रीमुखैः सरविसोमयुताभैः ।
एकभानुहिमभानुमनोज्ञं
मेरुमप्यजयदेष गिरीन्द्रः ॥ ३ ॥

अञ्चलैः शशिमुखीवसनानां
चञ्चलैः कटकसीमनि शैलः ।
सङ्घसङ्गसुकृतामृतसेका-
दुद्भवन्नयमपक्ष इवाभात् ॥ ४ ॥

आन्तरेण नयनेन जिनेन्दो-
राननेन्दुरुचिपानपराणाम् ।

१ क–ख–°तटेषु ।

अप्युदारगिरिशृङ्गविलासे
न श्रमः समजनिष्ट जनानाम् ॥ ५ ॥
नाम नामसुधया जिनभर्तुः
मासया जनमुखेषु न तृष्णा ।
दूरवर्त्तिनि सुखामृतकुण्डे
लोचनानि तृषितानि जनानाम् ॥ ६ ॥
प्राग्नियोजितमनोहृततीर्था-
धीशपादकमलाङ्कितमौलिः ।
शैलसानुषु जनो न तदानीं
तापमाप तपनांशुततिभ्यः ॥ ७ ॥
क्ष्मागतेन लघुकं यददर्शि
क्षोणिभृच्छिरसि तेन जनेन ।
उच्चकैर्विचरता ददृशे त-
त्सद्गसङ्गममदादिव पुष्टम् ॥ ८ ॥
देवभक्तिभरनिर्मितहस्ता-
लम्बनव्यतिकरेण जनोऽयम् ।
आसदद्गिरिशिरांस्यतिहर्षा-
न्मङ्क्षु सम्मुखमिवागतवन्ति ॥ ९ ॥
अद्भुतममदशालिषु शैलः
शेखरस्थितिषु तेषु जनेषु ।
भूतिभर्त्सितसुरेषु स रेजे
मेररत्नपरविच्छविपिङ्गः ॥ १० ॥

कर्मवैरिविजयाय सतेजा
नाभिभूपदनखांशुविचित्रम् ।
आरुरोह सचिवः शुचिदन्तं
दन्तिराजमिव तं गिरिराजम् ॥ ११ ॥
वीक्ष्य यक्षमिह सङ्घजनौघः
श्रीकपर्दिनमथाब्धिरिवेन्दुम् ।
क्षुभ्यति स्म चतुरः स चतुर्धा-
विस्तृतस्तरलहर्षतरङ्गः ॥ १२ ॥
अन्तरायदलनाय जनौघं
तीर्थसेवनकृतेऽभिपतन्तम् ।
द्रष्टुकाम इव वर्त्मनि दूरा-
दारुरोह गुरुशैलशिलां यः ॥ १३ ॥
भावनासलिलशालिनि शश्व-
त्तीर्थनाथपदपद्ममनोज्ञे ।
मानसे तनुमतां विलसन् यो
हंसवत्सृजति कामपि कान्तिम् ॥ १४ ॥
यक्षमुख्य ! स भवान् भुवनैक-
त्राणकारणमकारणबन्धुः ।
वत्सलेव जननी जनमेनं
नाथ ! पालयतु बालमिव स्वम् ॥ १५ ॥
श्रीकपर्दिनमिति स्तुतिपूर्वं
यक्षराजमभिपूज्य सहर्षम् ।

आशु सङ्घपतिरेप ससङ्घ-
स्तीर्थनाथनमनार्थमचालीत् ॥ १६ ॥
उत्सुकैरथ जनैर्जिनचैत्यं
वीक्ष्य मङ्क्षु पथि गामिव वत्सैः ।
व्यक्तशक्तिरभसत्रुटितोच्चैः-
कर्मबन्धतरलं मदधावे ॥ १७ ॥
संचरन् भुवि न माति जनो यः
स्फूर्तिसंकुचितमूर्त्तिलतोऽसौ ।
द्रष्टुमास्यनलिनं जिनभर्तु-
श्चैत्यधाम्नि स ममौ सममेपः ॥ १८ ॥
दल्यमानमसमानविमर्दे
हृद् हृदा ननु मिथस्तनुभाजाम् ।
आत्मभङ्गभयभङ्गुरसत्त्वै-
रन्तरारिभिरमोचि तदानीम् ॥ १९ ॥
पापपङ्कशमनाय जनानां
स्नानमन्तरकरोद् ध्रुवमात्मा ।
रोमवर्त्मसु जलेन विमर्दे
स्वेदपूरमिपतः मसृतं तत् ॥ २० ॥
आवभौ घनघनाघनलक्ष्मी-
रङ्गिनां मम्रदरोमविकारः ।
अन्तरस्थितजिनेन्दुरुचिश्री-
निस्सरद्दुरिततामसतुल्यः ॥ २१ ॥

लोचनैस्तनुमतामिति खिन्नैः
प्राप्य जैनवदनामृतकुण्डम् ।
आशु क्लृप्तसवनैरिव रेजे
सम्मदेन विगलज्जललेशैः ॥ २२ ॥
तत्र तादृशि जनस्य विमर्दे
शक्यते भ्रमयितुं न करोऽपि ।
वीक्ष्य विश्वविभुमेनमनृत्यन्
भाविनो यदि मुदा मनसैव ॥ २३ ॥
स्वीयतादृशविमर्दसुदूर-
क्षिप्तसूरकिरणः किल लोकः ।
रत्नभूपणविभिन्नतमिस्रो
भक्तिकृत्यमकृत प्रभुचैत्ये ॥ २४ ॥
धूलिधुम्रपद एव तदानी-
मागतो जिनपतिं प्रणिपत्य ।
दूरपूरितमनोरथवेगः
स्तोतुमारभत मन्त्रिवरोऽसौ ॥ २५ ॥
त्वद्गुणान् गदितुमीश ! समग्रा-
न्न स्वयं सुरवरोऽपि समर्थः ।
गोचरोऽप्यसि न मादृशवाचां
मौनमेव हि तव स्तवहेतुः ॥ २६ ॥
त्वां निरर्थकगिरापि तथापि
स्तौमि विश्वनुत ! मुग्धतयाहम् ।

प्रीतये निजशिशोः स्फुटलाला-
म्भांसि लल्लरवचांसि गुरूणाम् ॥ २७ ॥

न क्षमोऽयमहितानपि हन्तुं
स्वं कुटुम्बकमयं च मुमोच ।
जल्पिता जिन ! परैरिति दोषाः
प्रत्युत स्तवनतां तव जग्मुः ॥ २८ ॥

भाषितं भुवनभूषण ! भित्त्वा
कर्म निर्ममपते ! भवतेदम् ।
श्रूयते त्वदभिधापि कदाचि-
द्यत्र तत्र न करोति निवासम् ॥ २९ ॥

नाप्नुवन्ति भवबन्धनिकेता-
दग्रतस्तव गतस्य पदं ये ।
भ्रम्यते भ्रमवशाज्जिन ! मुक्त्यै
तैर्वृथैव पृथिवीवलयान्तः ॥ ३० ॥

त्वं मनोभवमपास्य पुनस्त-
ज्जन्मभीरुरमुचः स्वमनोऽपि ।
किं हरन्तु हरिणीतरलाक्ष्य-
स्तावकं तदमनस्ककिरीट ! ॥ ३१ ॥

प्राप्य रत्नमिव पुण्यपयोधे-
स्त्वां हृदि प्रणिदधाति जनो यः ।
स प्रयाति पुरुषोत्तमभावं
पश्य न स्वपिति किन्तु भवाब्धौ ॥ ३२ ॥

यामवाप्य न नमामि भवन्तं
तां न निर्वृतिमपि स्पृहयामि ।
त्वत्प्रसादवशतस्त्वयि भक्ति-
र्भातु मे जिन ! भवेऽपि भवेऽपि ॥ ३३ ॥
निर्मितस्तुतिरिति प्रतियातः
कृत्स्नमेष सुकृती कृतशौचः ।
स्नानहेतुकलशान् घुसृणाम्भः-
पूरितानयमचीचलदिन्द्रैः ॥ ३४ ॥
श्रावकाः प्रतिपदं हृदयाग्र-
न्यस्तहस्तधृतकाञ्चनकुम्भाः ।
निस्तरीतुमिव संसृतिसिन्धुं
कुर्वते स्म निरपायमुपायम् ॥ ३५ ॥
शुद्धसङ्घपतिकीर्त्तिलतानां
विष्टपत्रितयगर्भगतानाम् ।
आतपत्रपटली विमलश्री-
रादिकन्दवदियं विरराज ॥ ३६ ॥
अत्युदारतरनर्त्तनगीतै-
रुत्सवेन महता महताघः ।
प्राप मन्त्रितिलकः किल कर्म-
ध्वंसिनो जिनपतेरथ चैत्यम् ॥ ३७ ॥
कुङ्कुमाम्बुभिरसिस्नपदीशं
श्रावकैः सह यथाविधि मन्त्री ।

तैर्विधौततनुरेष तदाभू-
त्पर्वतो विमल इत्युचिताह्वः ॥ ३८ ॥
अङ्गमण्डनमखण्डनमासी-
न्निर्मितं मृगमदैर्जिनभर्तुः ।
चलृप्तसन्नहनसन्निभमुच्चैः
कर्मकूटरिपुकोटिजयाय ॥ ३९ ॥
भूरिपुष्परचिता जिनभर्तु-
र्लम्बिताः कृतिभिरर्चनमालाः ।
अग्रभूष्णव इव स्मरमुक्ता
भल्लयो वपुषि भूषणमासन् ॥ ४० ॥
तैस्तथा जिनपुरस्तिमिरोर्मि-
र्निर्ममेऽथ पृथुधूपजधूमैः ।
सस्पृहेव सचिवं सुकृतश्रीः
कौतुकादभिससार यथासौ ॥ ४१ ॥
आरात्रिकं कृतमथ प्रथमस्य तीर्थ-
भर्तुः पुरः स्फुरदुरुद्युतिचक्रवालम् ।
उच्चावचप्रसरणैर्निजघान सङ्घ-
दोषद्विपः कुसुमवृष्टिविराजमानम् ॥ ४२ ॥
इत्थं प्रेक्षणकक्षणाहितमनाः संपूज्य विश्वत्रयी-
पूज्यं नाभिसुतं समाप्य च तथारूपामिहाष्टाहिकाम् ।
मन्त्रीशः प्रतिलाभितव्रतितातिः शत्रुञ्जयोर्वीधरा-
दुत्तीर्णः कृतमङ्गलः समजनि श्रीनेमिसेवोत्सुकः ॥

किञ्च—

शौर्यैर्वज्रधरस्य दैत्यमरुतामाचार्ययोः प्रज्ञया
दानैर्देवगवीमणिक्षितिरुहां स्वर्गस्थिरं गर्वितः ।
एकेनैव विभूषणेन भवता श्रीवस्तुपाल ! क्षिति-
स्त्वं निर्जित्य मुदा तवाशिषमदादेवं मदायुर्भव ॥१॥

कल्पान्तोद्भ्रान्तभास्वत्करनिकरनिभो विश्वमन्तः समन्ता-
त्सन्तापस्त्वत्प्रतापज्वलदनलभवः केन शक्येत सोढुम् ।
मन्त्रिन् श्रीवस्तुपाल ! त्रिजगति यदि ते कीर्त्तिलेखेव न स्या-
दन्तःपीयूषपेया बहिरपि च मुहुश्चन्दनोद्वर्त्तनानि ॥२॥

भासि दौःस्थ्यतरुखण्डखण्डनै-
र्वस्तुपाल ! भुवि दानिकुञ्जरः ।
चित्रमत्र किमु शङ्खमर्दनं
यत्त्वया कृपणलीलया कृतम् ॥ ३ ॥

काव्यमेतदरिसिंहनिर्मितं
सर्वतोमुखतयैव रङ्गभूः ।
वस्तुपालसचिवेन्द्रकीर्त्तिभि-
र्नर्त्तकीभिरिव यत्र नृत्यते ॥ ४ ॥

प्रतिसर्गं प्रबन्धेऽस्मिन्नरिसिंहविनिर्मिते ।
इमान्यकृत चत्वारि काव्यान्यमरपण्डितः ॥ ५ ॥

॥ इति श्रीसुकृतसंकीर्त्तननाम्नि महाकाव्ये शत्रुञ्जयदर्शनो नाम सप्तमः सर्गः ॥ ७ ॥

---

१ ग–महायुर्भव ।

॥ अथाष्टमः सर्गः ॥



सचिवः समं सपदि सङ्गजनै-
रथ देवपत्तनमगान्नगरम् ।
प्रणनाम कामजयिनं नयन-
प्रियमिन्दुलाञ्छनमिहोग्रमहाः ॥ १ ॥
विधुमौलिमौलिविधुधामभरै-
रिह मे भविष्यति सदाभ्युदयः ।
इति पाथसामप्रभुमत्र पतिं
कृतवासमैक्षत स मन्त्रिपतिः ॥ २ ॥
इह सोमनाथमुकुटोल्लसितैः
सरिदम्बुभिर्विधुविभाभिरपि ।
सततप्रवृद्धविहरल्लहरी-
निहवध्वनिध्वनितदिग्वलयम् ॥ ३ ॥
सततान्तरालशयविष्णुवपु-
र्विभवर्द्धिभाभिरिव मेचकितम् ।
उदयत्तदीयशयनीयफणि-
स्फुटरश्मिराशिनिभफेनभरम् ॥ ४ ॥
सलिलेन विश्ववलयमत्ययः
समये मयैव रचनीय इति ।
मुहुरीरितापहृतरीचिर्भर-
जेन्यन्तमन्वहमिहाभ्यसनम् ॥ ५ ॥

पुरुषोत्तमो हृदि मदीयमुवं
शिरसीश्वरोऽपि विदधाति सदा ।
प्रमदादुदारतरगर्जमिव
प्रकटं नटन्तमिव वीचिकरैः ॥ ६ ॥
अपि वज्रभाजि कुपिते शुपतौ
कृतरक्षणं क्षितिभृतामभितः ।
स्फुरितोर्मिबाहुमिति कीर्तिततीं-
र्जगति क्षिपन्तमिव फेनमिषात् ॥ ७ ॥
अकृशैः कृशैश्च नवशुक्तिफल-
मकरैर्विभान्तमभितः शुचिभिः ।
शिशुभिर्निजैः शशिभिरङ्कधृतै-
रिव भाविभूरितरकल्पकृते ॥ ८ ॥
द्युमणिः क्षपामणिरपि प्रभया
मपि मुच्यते जयति कोऽयमिह ।
इति विस्मयादपरवारिधिना
सचिवोऽप्यनन्यसदृशो ददृशे ॥ ९ ॥
अथ फल्गुचित्तशुचिरम्बुनिधिः
स्फुरितेन्द्रनीलमणिनीलरुचिः ।
रभसादसस्मरदमात्यपते-
र्नमनाय नेमिजिनमात्मगुणैः ॥ १० ॥
अथ संचलन्नचलरैवतकं
पुरतः स्फुरत्पवनलोललतम् ।

अवलोक्य वारिदमिवाशु कदा
शुकदारदीप्तिभवदीयवपुः ॥ २२ ॥
नयनाग्रवर्त्मनि परिस्फुरतीं
दुरितान्धकारपटलीं विकटाम् ।
दलयन्ति मे त्रिजगदीश ! कदा
भवदीयपादनखदीपशिखाः ॥ २३ ॥
भुवनैकनाथ ! भवदीयवपु-
र्विपुलप्रभापयसि मग्नमपि ।
द्वितयं कदा नयनयोरिह मां
हिमहारतारगुण ! तारयति ॥ २४ ॥
तदपीयत श्रुतिपुटेन यशः
सततं विपण्णदिविपन्नदि ते ।
भवदङ्गदीप्तिमसुना यमुना-
जयिनीं धयामि नयनेन कदा ॥ २५ ॥
नलिनादिपुष्पनिवहेन सुरै-
र्यदपूजि पादयुगमीश ! तव ।
जिन ! तेन पङ्कजनिभेन कदा
जनयामि पूजितमिवात्मशिरः ॥ २६ ॥
इति गद्गदाश्रुपुलकाकुलितः
कलयन्मनोरथमनन्यमनाः ।
सचिवः शिवातनयमात्तनयः
क्षणमेकमैक्षत पुरोगमिव ॥ २७ ॥[1]

अथ कल्पिताखिलविभातविधि-
गिरिमारुरोह सह सङ्घजनैः ।
सचिवो जिनक्रमनखेषु पुरो-
गमितेन कृष्ट इव मङ्क्षु हृदा ॥ २८ ॥
तदनु प्रमोदरभसेन रजः-
प्लुतपाद एव विननाम जिनम् ।
अपि चैष नेत्रगमिताक्षगण-
प्रसरक्षणं निभृतमीक्षितवान् ॥ २९ ॥
रचिताङ्गशौचविधिरिन्द्रगणैः
सहितो जिनस्नपनहेतुरथ ।
जिनभक्तिरागमिव मूर्त्तमसौ
कलशेषु कुङ्कुमजलं न्यदधात् ॥ ३० ॥
अथ केऽपि भक्तिभरभासुरिताः
स्फुरिता जिनस्य पुरतः परितः ।
स्वयमुत्सवं विदधिरे मधुर-
ध्वनिगीतिरीतिमयवाद्यलयम् ॥ ३१ ॥
वदनाग्रभागगतपाणियुग-
स्थितभेरिदण्डमिषदन्तकरः ।
शुशुभे करीन्द्र इव मन्द्ररवः
किल कोऽपि पापतरुपातपटुः ॥ ३२ ॥
अपरः पयोदरववादभव-
न्निनदं मृदङ्गमपि वादितवान् ।

नन्नृते दरस्फुरितभोगिशर्तः
क्रतिनां मनोमयमयूरकुलैः ॥ ३३ ॥
अपरस्य वंशमपि वादयतो
मधुरस्वरैः प्रमदिनां क्रतिनाम् ।
यदमीलि पक्ष्मपुटकेन रसा-
त्तदवेशि कर्ण इव नेत्रमृगैः ॥ ३४ ॥
अपरः पिबन्नपि शिवातनुभू-
वदनेन्दुदीधितिसुधां स्थिरदृक् ।
भृशमुज्जगार जनयन् जनता-
हृदि संमदं ललितगीतमिषात् ॥ ३५ ॥
चटुला नटी सरसनृत्तवशा-
दिह रत्नभूषणशुभा शुशुभे ।
कुलदेवतेव तडितां तरला
जलदद्युतेर्जिनपतेः पुरतः ॥ ३६ ॥
इति संमदेन जिनमस्नपयद्
घुसृणाम्बुभिः क्रतिपतिः स तथा ।
कपिशो यथायमपि रैवतकः
किल देवताद्रिसदृशो ददृशे ॥ ३७ ॥
स्वहृदः प्रमोदविशदस्य रसा-
त्परमाणुभिः पुर इव प्रसृतैः ।
सचिवेन सारघनसाररसै-
र्नवमङ्गमण्डनमकारि विभोः ॥ ३८ ॥

कुसुमायुधस्य कुसुमानि मना-
गपि संमुखानि नहि यत्र ययुः ।
इह तानि तीर्थकृति सङ्घटयन्
स बभौ कृती मदनतोऽप्यधिकः ॥ ३९ ॥
यमुनौघसङ्गमधिया सचिव-
प्रथितेऽथ धूपमयधूमभरे ।
ममदेन तत्क्षणमकारि नभः-
सरिदम्बुनि घुसृणिभिः सवनम् ॥ ४० ॥
अथ तामसं कवलितं चलिता-
ञ्जनकैतवेन भृशमुद्गिरता ।
नवदीपिकापरिकरेण चिरं
निरराज यज्जिनमयं सचिवः ॥ ४१ ॥
स्फुटमष्टकर्ममथनोऽयमिति
मथयन्निहाष्टदिवसानि महम् ।
स्वयमष्टमूर्तिमुकुटेन्दुसमं
सचिवोऽष्टसु न्यधित दिक्षु यशः ॥ ४२ ॥
सचिवस्य दास इव शब्दजितो
जलवाह एष गिरिमूर्ध्नि वहन् ।
न ववर्ष सङ्घजनतार्त्तिभयात्
त्रुटितान्यपूरि सलिलानि पुनः ॥ ४३ ॥
देयाः स्वामिन्पुनर्मे सुकृतपुरपुरोढौकनानीति जल्प-
न्नानन्दस्पन्दसारैरिव घटितमना नेमिनाथं प्रणम्य ।

नामं नामं निकामं विधिवदविधुरं मन्त्रिमान्योऽयमम्बा-
शाम्बप्रद्युम्नमुख्यानपि पुलकिवपुः पर्वतादुत्ततार ॥४४॥

किञ्च—

स्वस्ति श्रीदेवलोकादमरपरिवृढः क्ष्मातले श्रीविशालं
मन्त्रीशं वस्तुपालं कुशलयति यथा जीव ! कल्पान्तकोटीः ।
लीनास्त्वत्कीर्तिगाने यदसुरविसरा न स्मरन्त्येव वैरं
स्वैरं वामी स्मरन्तु त्वदरिभिरभवन्दुर्जया मे ध्वजिन्यः ॥१॥
चञ्चत्काञ्चनकूटकोटिघटितक्रीडाचलैर्याचक-
स्तोमैः प्रस्तुतवस्तुपालसचिवप्रासार्थसार्थस्मितैः ।
अस्त्येषां किमु नाम धामनि कियद्दास्यन्त्यमी याचिता
मत्वैवं न ययाचिरे बत परे कल्पद्रुकल्पा जनाः ॥२॥
उच्चरणचारचारुस्तव खड्गः किमपि सुरभसारम्भः ।
श्रीवस्तुपाल ! जगति व्यजयत संग्रामसिंहममुम् ॥३॥
लावण्यसिंहतनयाननसोमरश्मि-
स्तोमं खलास्यकमलालिकलापहारी ।
श्रीवस्तुपालसचिवाधिपकीर्तिदुग्ध-
सिन्धुं तरङ्गयति नित्यमयं प्रबन्धः ॥ ४ ॥
प्रतिसर्गं प्रबन्धेऽस्मिन्नरिसिंहविनिर्मिते ।
इमान्यकृत चत्वारि काव्यान्यमरपण्डितः ॥ ५ ॥

॥ इति सुकृतसंकीर्तननाम्नि महाकाव्ये श्रीनेमि-
दर्शनो नामाष्टमः सर्गः ॥ ८ ॥

॥ अथ नवमः सर्गः ॥



अथ गिरीशतटीषु मनीषिणां
परिवृढः परिपूर्णमनोरथः ।
षडपि तत्र ददर्श ऋतून् कला-
शुचिरयं चिरयत्रितविभ्रमान् ॥ १ ॥

प्रकटितायसकर्तरिका मधौ
मधुसखस्य भटा इव किंशुकाः ।
भ्रमरसङ्गसितेतरविस्फुर-
त्सुमनसो मनसो ददते मुदम् ॥ २ ॥

इदमभूद्दलयन्नलिनीः प्रियाः
मम महःपरिखण्डनहेतवे ।
इति हिमस्य भिदामहिमद्युतिः
स्म तनुते तनुतेजितविष्टपः ॥ ३ ॥

स्मरशिखी तनुमानिव चम्पकः
कुसुमितो मधुपावलिधूमितः ।
दहति काननसीमनि काञ्चन-
च्छविरहो विरहोपितयोपितः ॥ ४ ॥

स्मितसरोजमुखीमुखवासना-
सुरभिमद्यविशेषितसौरभम् ।
परिहृतापरवल्लिमधुव्रती-
धवकुलं वकुलं प्रति धावति ॥ ५ ॥

सुमनसां त्वमसि स्थितिभूस्त्वया
जयति विश्वमसौ कुसुमायुधः ।
मधुमितीह रसालरसालसा
पिकवयः कवयः कवयन्त्यमी ॥ ६ ॥

स्मरनृपस्य चरत्वमुपागता
द्विजचयाः मधुरध्वनिशालिनः ।
मधुलिहः सुमनस्सु ददुः पदं
तिलकजालकजातविभूतयः ॥ ७ ॥

दधुरनङ्गनिपङ्गतुलामधो-
मुखशिलीमुखराजिविराजिताः ।
स्फुटविकाशमुखाः कमलाकराः
न पथि कं पथिक प्रति प्रीतये ॥ ८ ॥

स्तुतगुणं कुतुकेन मधुव्रतै-
रिव रवाकुलितैः सुमनोमयम् ।
मधुसखाय मधोर्विनियोगतः
शरचयं रचयन्तितमां लताः ॥ ९ ॥

व्यथयति प्रथितारुणतेजसो
दहनमन्त्रमयादिव शस्त्रतः ।
मधुसखोऽयमशोकलतालस-
त्कुसुमतोऽसुमतो विरहातुरान् ॥ १० ॥

मलयजद्रुमसङ्गिभुजङ्गम-
स्फुरितफूत्कृतिसंभ्रमसंभृतः ।

पथिकलोकदृशां मलयानिलः
सुविषमो विषमोहमिव व्यधात् ॥ ११ ॥
कमलकोमलकोशकुचोन्नते-
रलिकलालिकलासितसंपदः ।
व्रततिका ततिकायवनश्रियो-
ऽधिकमशोकमशोभत पाणिवत् ॥ १२ ॥
कमलकान्तिहरीं कृशतां नयन्
सह हिमाद्रिहिमेन विभावरीम् ।
कमलबन्धुकृतोन्नमनो बभौ
शुचिरयं विरचन् दिवसश्रियम् ॥ १३ ॥
द्रुतसमेतदिनाधिपतिप्रभा-
परिगलद्धतशेषतमीकणाः ।
अनिललोलशिरीषरजश्छलाद्
द्विरदनीरदनीलरुचो बभुः ॥ १४ ॥
अहमिहारुणधाम्नि सितेतरो
बत विभाम्यथवात्र सितच्छवौ ।
भ्रमति भृङ्गयुवा नवपाटले
विचकिले च किलेति मुहुर्मुहुः ॥ १५ ॥
तरलतारलताग्रहपङ्कज-
च्छदनचन्दनचन्द्रमरीचिभिः ।
तपनतापनताकृतिरप्यसौ

१ क-ख-पथिकलोरद° ।

रतिवरोऽतिवरोरुषु जृम्भते ॥ १६ ॥
नभसि दर्पणतुल्यतडिल्लता
जलदपद्धतिरुद्धतडम्बरा ।
मदनसैन्यगजव्रजवद्बभौ
कृतरवा तरवारिसितेतरा ॥ १७ ॥
[1]वियदमीमिलदर्कनिशाकर-
द्वयमये नयने भयतो भृशम् ।
यदतुलां तडितं घनमालिका-
धिकरवा करवालमिवाक्षिपत् ॥ १८ ॥
यदयमेतदवाप्य तपस्विनां
हृदि हतोऽपि जिजीव मनोभवः ।
अपि भुजङ्गभुजां शुशुभे सुधा- (?)
कवचनं वचनं शिखिनां ततः ॥ १९ ॥
मदभिवर्धितसिन्धुमहीरुह-
व्रजविशोपकमेतदिति क्रुधा ।
अधिकमर्कमहः सहसा घनैः
कवलितं वलितं तडितां मिषात् ॥ २० ॥
अपरता परतापककण्टिका-
हतककेतककेलिषु षट्पदी ।
अमलकोमलकोरकसौरभ-
स्थितिषु जातिषु जातरसाभवत् ॥ २१ ॥

---

१ क-ख-अभिमु° ।

अलकलोलमधुव्रतमञ्जुलाऽ-
म्बुजमुखी जयनोज्ज्वलसैकता ।
शरदि हंसरवेण समाश्रिता
धृतरसा तरसा तटिनीवधूः ॥ २२ ॥
क्वचन भर्तरि याति तपात्यये
घनघटाश्रुजलानि मुमोच न ।
विरहवह्वती तपनं व्यथा-
प्रदममन्दममङ्गलशङ्कया ॥ २३ ॥ युग्मम् ॥
पदमधत्त गतस्य पयोमुचः
सुहृदशून्यमसौ शिखिनां गणः ।
गलितपत्रमयातपवारणै-
रविभवं विभवं महसां क्षिपन् ॥ २४॥
समुदिते मुदितेऽम्बुरुहि श्रिये
कुवलये वलये सरितां तथा ।
अमृत संभृतसंपदमर्यमा-
च्छविमलं विमलं च विधुर्महः ॥ २५ ॥
खररुचेर्विजयाय निजद्विपः
सहसि साहसिकीव विभावरी ।
प्रतिदिनं परितः परिवर्धितो-
त्तमहिमा महिमानमुपाययौ ॥ २६ ॥
तुहिनमन्दतरां मलिनेऽब्जिनी-
मलिनि मुञ्चति रागपरामपि ।

करणिकाभिरहो ! शतपत्रिकाः
सह सितं हसितं परितन्वते ॥ २७ ॥
पदमकारि मुखे सुदृशां सदा
विमलकान्तिनि कुङ्कुमपण्डिते ।
हिमरुचः कमलस्य च संपदा
हिमनिकामनिकारविनुन्नया ॥ २८ ॥
तुहिनवाहिनवाङ्कुतवातभी-
रुचितकुञ्चितकुङ्कुमकैतवात् ।
वरतनूरतनूष्मणि भास्वरा-
तपततिः पतति स्तनमण्डले ॥ २९ ॥
हिमभरस्य *तपःप्रथितोन्नते-*
र्वनमहीरुह एव भुजो भृशम् ।
निजरिपोरपि निर्गमनोद्यमं
दिनकरो न करोति कथञ्चन ॥ ३० ॥
पुलककम्पितशूत्कृतिभिः परि-
ष्वजनकर्म दिशन् हरिणीदृशाम् ।
हिममयः पवनो ननु कामिना-
ममितकामितकारणतां ययौ ॥ ३१ ॥
पथिककाननलग्नमनोभव-
ज्वलनसंभवधूमभरोपमम् ।
नवलवङ्गरजः पवनाहृतं

[1] एतत्पद्यं क-ख-पुस्तकयोर्नास्ति ।

जगति रङ्गति रङ्गितपट्पदम् ॥ ३२ ॥
दिनमयं नमयन् सहसा कृत-
स्मरजनी रजनीः परिवर्धयन् ।
विरहितारहितासु सुखोर्मिका-
रसमयः समयः शिशिरो भृशम् ॥ ३३ ॥
सततकुसुमितानृतूनशेषा-
निति समकालमिहावलोक्य मन्त्री ।
अधुनुत विदितमभुमभावा-
तिशयविचारचमत्कृतः किरीटम् ॥ ३४ ॥
शैलेऽस्मिन्पुरहूतपौरमिथुनैर्मन्त्रीशनिर्मापित-
श्रीमन्नेमिजिनेश्वरोत्सवभवत्कौतूहलाकारितैः ।
रन्तुं नित्यषडर्तुभूतिविभवद्वल्लीभवल्लीलया
सानन्दैरतिमन्दनन्दनवनीमुक्तस्पृहैः स्पृहे ॥३५॥
कुसुमावचायमनसां श्रवणे
सुरयोपितामथ सरोजजुपि ।
कुसुमादुपेत्य निभृतध्वनयो
दधतीव भेदमलिनो मलिनाः ॥ ३६ ॥
वयमेव शस्त्रपदवीं गमिता
मदनेन संप्रति किमेभिरिति ।
अवचिन्वते स्म कुसुमानि तदा
रमणैः समं सुरकुरङ्गदृशः ॥ ३७ ॥
नवदृक्षमूर्ध्नि यदकारि तप-

स्तपनातपेन धृतरागभरैः ।
तरुणीकरग्रहणपुण्यफलं
नवपल्लवैरिदमलाभि ततः ॥ ३८ ॥
नवपल्लवा निजविभूतिहृतो
वनवर्तिनः स्फुटमशोकजुषः ।
परिकम्पिनो हठवशादरुणै-
स्तरुणीकरैर्निभिदिरे रभसात् ॥ ३९ ॥
कुसुमार्पणेषु रमणः सुदृशा
प्रथितेऽन्यनाम्नि लघुतां गमितः ।
हृदयात्तदा त्वतरलेन सह
श्वसितेन तूलवदकारि बहिः ॥ ४० ॥
ददता प्रसूनमपराभिधया
दयितेन वज्रनिभयाभिहिते ।
हृदि मानिनी ननु विधाय दृशं
सजलामवागतनुत श्वसितम् ॥ ४१ ॥
उदितं प्रियेण निभृतं चतुरा
परगोत्रमश्रुतवती च रहः ।
तदुरस्थपुष्परजसि श्वसितं
व्यथिताप्यमश्रु च तदुद्दयने ॥ ४२ ॥
सृजता स्रजं शिरसि पद्मदृशो
मृदुचुम्बता प्रियतमेन पराम् ।
अपि शेमुषीश्लथतया न रसा-

इदृशे परा न तयापि रुषा ॥ ४३ ॥
सकलस्वकीयकुसुमस्वहृति-
प्रतिपन्थिनीः प्रति भृशं सुदृशः ।
अमुचन् शिलीमुखशतानि लताः
समभूपयन्नहह तान्यपि ताः ॥ ४४ ॥
अथ काननान्तरविहारभव-
नवखेदभेदरभसेन ययुः ।
दयितैः समं मृगदृशोऽम्बुनिधि-
प्रतिहस्तकं सवनहेतु सरः ॥ ४५ ॥
तरुणीसमागमवनेन जना-
त्किल पल्वलोऽजनि मुदा द्विगुणः ।
विलसत्तरङ्गकरकोटिरयं
तिरयन्निजाः कमलनीदयिताः ॥ ४६ ॥
अतिदूरतः सरभसं रसभाक्
समुपेत्य लोलविपयव्यसनः ।
कुचयोर्विलुठ्य सुदृशां विलयं
प्रययौ तरङ्गनिकरः सपदि ॥ ४७ ॥
दयितेषु तोयजवनेषु गते
रभसेन यत्र कलहंसकुले ।
सरसी रराज सुदृशां वदनैः
कुचमण्डलैरपि च फेनभरैः ॥ ४८ ॥
हरिणीदृशां कलितरागभरं

कुचसङ्गमेन परिरब्धरसम् ।
मुहदम्बुजन्मकपटेन सरः
परिमीलयत्यतिसुखीव दृशः ॥ ४९ ॥
अवलोक्य कोऽपि रभसेन जनं
विपरीतलोचनमुदाररसः ।
हरिणीदृशा श्रुतिसरोजकृता-
ननचुम्बनव्यतिकरो हसितः ॥ ५० ॥
अभिसेचनेन नयनप्रसृति-
प्रसरत्कटाक्षरसतोऽनुपति ।
अपरा सखीं प्रति करप्रसृति-
च्युतनीरशून्यजलकेलिरभूत् ॥ ५१ ॥
द्रुतमुद्धृतेऽम्बुजमिति प्रकटे
मुदितस्य वारिणि करे कमितुः ।
विदितस्य वीक्ष्य मुखमस्य नवा
रमणी न किं किमहृत त्रपया ॥ ५२ ॥
इत्थं केलिरसप्रसक्तमनसः स्वर्गौकसो भास्करे
यातेऽप्यम्बुनिधिं सरःकुमुदिनीबोधप्रबुद्धश्रियः ।
श्रीमन्त्रीश्वरवस्तुपालयशसा शुभ्रे सदैवाम्बर-
प्रोटे वैभरपिष्टरिष्टघनमःस्तोमेन जग्मुर्दिवम् ॥५३॥
किञ्च —
अस्मिन् यावदखर्वपर्वतघटा गुर्वी पृथ्वी धृतं
नागमन्दतु वस्तुपाल ! जगतीपुण्यैरगण्यैर्भवान् ।

येनैतां भुजगाधिपस्तव भुजे विन्यस्य नागाङ्गना-
गोष्ठीगीतभवद्यशःश्रुतिरसैराचान्तचित्तोऽभवत् ॥१॥
आजन्मापि कृशाकृतिं द्विजपतिं स्वे मूर्धनि स्वर्धुनी-
धौते धारयते जगत्पतिरसावग्र्यो गुणग्राहिणाम् ।
सद्यः सङ्गतमप्यमुं वसुभरैः पुष्णाति पूषा शिरो-
भूषा दानवतामुभावपि शुभावेतौ वसन्ते गुणौ ॥२॥
श्रीवस्तुपाल ! रणभाजि भवत्कृपाणे
धाराधरेऽपि परवारणविभ्रमेऽस्मिन् ।
उत्पत्य कोपतरलं सहसा जगाम
संग्रामसिंह इति स स्वयमेव भङ्गम् ॥ ३ ॥
वस्तुपालसुकृतामृतप्रपा
काव्यमूर्तिररिसिंहमन्त्रिता ।
कण्ठदघ्नरसपायिनः शिरः
कम्पयन्ति किल यत्र कोविदाः ॥ ४ ॥
प्रतिसर्गं प्रबन्धेऽस्मिन्नरिसिंहविनिर्मिते ।
इमान्यकृत चत्वारि काव्यान्यमरपण्डितः ॥ ५ ॥
॥ इति सुकृतसंकीर्तननाम्नि महाकाव्ये षड्ऋतु-
वर्णनो नाम नवमः सर्गः ॥ ९ ॥

॥ अथ दशमः सर्गः ॥

तदनु वदनकान्तिन्यक्कृतेन्दुः कृतीन्दुः

समुदितमदपात्रं पूर्णयात्राभिलापः ।
इह विहितनिवासः काशसंकाशकीर्तिः
ऋशितवितत कर्मा निर्ममे सङ्घभोज्यम् ॥ १ ॥
मलयजमयमम्भः पादयोरुत्तमाङ्गे
घनमथ घनसारं चीवरं चारु चाङ्गे ।
यश इव निजमीदृग्रूपमारोप्य तेन
स्मयरसमुपनीताः साधवोऽगाधबोधाः ॥ २ ॥
सत्रं यत्र तदापि रत्नकनकस्तोमैरतुच्छाशये
तस्मिन् यच्छति वाञ्छिताधिकतरं दीनेषु दूरादपि ।
मन्येऽपूरि ततो गभीरिमजितो रत्नानि रत्नाकर-
स्तस्य स्थैर्यनिराकृतश्च करदो हेमानि हेमाचलः ॥३॥
किं सूते कर एव हेमनिकरं श्रीनेमिभक्तिक्रिया-
तुष्टे रैवतकाधिदैवतकुलैः किं वा निधिः पूर्यते ।
इत्थं याचकसञ्चयस्य किमपि स्वस्यापि वाञ्छाधिकं
तस्मिन् यच्छति खेचरेष्वपि चमत्कारश्चकार स्थितिम् ॥
तदानीं दीनौघे मुहुरपि गृहीत्वा बहुतरं
स्वयं निर्विण्णेऽस्मिन् ददद्यमनिर्विण्णहृदयः ।
अहो किञ्चित्कोऽपि क्वचिदपि न याचेत वचनं
चिरादुच्चार्येदं धवलकपुरे गन्तुमुदितः ॥ ५ ॥
दुष्कर्माद्रिपविः पवित्रमहिमा नास्यां कदाचिन्महा-
मोहध्वान्तरविः भविष्यति भृशं सङ्घो महोत्साहवान् ।
इत्थं पापलिपिं विलुप्य करणे भालोपमे यामन-

स्थल्याः पुण्यदिनं चकार सुकृती कुर्वन् प्रवेशोत्सवम् ॥
कर्पूरागुरुधूपधूमपटलैरुत्क्षिप्यमाणैः प्रति-
ग्रामं तीर्थकृतामनेन कृतिना ये जज्ञिरे वारिदाः ।
तैरेव त्रुटिते जले पथि तथा प्रेम्णैव दृष्टं यथा
संपूर्णानि सरोवराणि न पुनः सिक्तोऽपि मार्गोऽनसाम् ॥
स्वस्थानप्रसृतस्ववल्लभजनप्राग्भारसद्यःपरी-
रम्भारम्भपुरःप्रसृत्वरमनोवेगावकृष्टैरिव ।
सार्कं सङ्घजनैः समुज्झिततमोभारैस्तदौत्सुक्यतो
गच्छद्भिर्धवलक्कभिधपुरोपान्तं प्रपेदे कृती ॥ ८ ॥
स्मेरत्कास्मीरनीरच्छुरितपथतया रागमासाद्य सद्यो
लीलालोलत्पताकाञ्चलतरलचमत्कारिचञ्चत्कटाक्षा ।
जातक्षोभा पुरीयं सविपुलपुलकाकीर्णदूर्वाङ्कुराग्रैः
प्राप्ते श्रीवस्तुपाले प्रति सचिवशचीवल्लभे वल्लभेऽस्मिन् ॥
इयं सर्वाङ्गीणप्रगुणितविभूषा किल तदा
तदाश्लेषं यावत्क्षणमिव पुरी भासुररसा ।
अभूदन्तःशून्या हृदय इव याते पुरजनैः
समं श्रीमन्त्रीशं प्रति सरभसं वीरधवले ॥ १० ॥
श्रीवीरधवलतेजःपालाभिधसचिवमध्यगः सचिवः ।
त्रिपुरपरीतिस्थापितहर इव हरति स्म तत्र मनः ॥ ११ ॥
भास्वन्निस्वानभेरीमुरजभरजनिध्वानसंतापभीति-
भ्रष्टाहङ्कारदेवीकृतरभसपरीरम्भसंरम्भहृष्टैः ।
शक्राद्यैर्देवचक्रैरपि सचिवपतिस्तूयमानस्तदानीं

त्रस्तासौ परिहृत्य नित्यसुखिता विश्राम्यति श्रीरिह॥२३॥
बुद्धिर्लतेव तव विस्फुरिता समस्त-
शास्त्रामृतैरिह भृते हृदयालवाले।
श्रीवस्तुपाल ! भुवि यत्प्रभवा प्रसून-
मालेव मौलिषु न कैरघटि त्वदाज्ञा ॥ २४ ॥
श्रीसोमान्वयकुट्टिमोद्धृततुलापट्टः पतद्दुर्बलः
श्रेयोयष्टिरनिष्टविष्टपविपत्सन्दोहलोहार्गला।
श्रीविश्रामतरुः पराक्रमकरिस्तम्भो रिपुक्षोणिभृ-
द्दम्भोलिस्तव भाति गुर्जरधरोद्धारैकधुर्यो भुजः ॥२५॥
असौ भृशं सन्ततसंचरिष्णु-
लक्ष्मीपदालक्तकरक्तकान्तिः।
भवत्कराम्भोरुहवद्विभाति
कृष्णारिनारीचिहुरालिपालिः ॥ २६ ॥
असन्नं सन्नद्धे यदिह विहरन्मार्गणगण-
सयत्नोरे मेरोः कटकमटितः कल्पविटपी।
इति व्यक्तं युक्तः सचिव ! कुलकोटीर ! करज-
व्रजव्याजेनायं मणिमुकुटबन्धस्तव करे ॥ २७ ॥
किल जगति भवद्गतिं विलोक्य
स्वगतियशःक्षितिभीरवः सुरेभाः।
सचिव ! तव भुजेऽपि भूमिभारं
दधति पदात्पदमप्यमी न चेलुः ॥ २८ ॥
क्रमकमलयुगेऽस्मिन् सेवका देव ! कामं

तव सचिव ! नमन्तः प्रीतिमन्तः समन्तात् ।
नखरुचिजलवीचीधौतभालस्थदौस्थ्या-
क्षरततय इवामी भूतिभारं भजन्ते ॥ २९ ॥
इति वर्ण्यमानगुणगौरवो रवो-
द्धुरवन्दिवृन्दवरभारतीभरैः ।
जिनदेवतालयपुरस्सरः शनैः
प्रविवेश पत्तनमसौ महामतिः ॥ ३० ॥
अथ तं विलोकयितुमाकुलं कुलं
सुदृशां गवाक्षपदवीषु कौतुकात् ।
अचलत्तदार्द्धकृतमुक्ततत्क्षण-
क्रियमाणकर्मतति दर्शितादरम् ॥ ३१ ॥
विरचय्य कापि मणिकुण्डलं श्रुतौ
द्रुतमेकमेव चलिता कुतूहलात् ।
जगदुत्तमाननकुशेशयस्मय-
स्वयमागतद्युमणिमण्डला बभौ ॥ ३२ ॥
औत्सुक्यभावकृतभूषणवैपरीत्या
कर्णावलम्बितमणिश्रितकङ्कणाभ्याम् ।
काचिच्चकार जितकुञ्जरकुम्भशोभे
पीनोन्नतस्तनतटे मुकुटावबन्धम् ॥ ३३ ॥
औत्सुक्यतः काचन चित्रकार्थं
करे गृहीतां मृगनाभिमेव ।
स्निग्धाञ्जनभ्रान्तिवशात्किरन्ती

नेत्रद्वये तत्र दधौ मृगत्वम् ॥ ३४ ॥
वैकक्षमाल्यमिलितः शुशुभे परस्याः
पक्षान्तरमसृमरः कबरीकलापः ।
सर्वायसं कुसुमकार्मुकसन्निधाने
पृथ्वीवरानिव निहन्तुमधादनङ्गः ॥ ३५ ॥
ताडङ्कमेकं कर एव काचि-
त्तदा वहन्ती चपलं चचाल ।
त्रैलोक्यजैत्रस्मरचक्रवर्त्ति-
पताकिनीवाग्रविलासिचक्रा ॥ ३६ ॥
अथात्पदे सपदि काचन काञ्चनस्य
हिञ्जीरमङ्कुरितकौतुकमेकमेव ।
स्त्रीषु स्वकीयविजयध्वजिनीषु ;बिभ्रे
दत्तं तु वीरकटकं मकरध्वजेन ॥ ३७ ॥
कृत्वैकमेव निजमञ्जनमञ्जु नेत्र-
माविभ्रती परमनञ्जनमेव काचित् ।
आभूषितं तु सहजं तु विशेषहृद्यं
जालागता किल विचारयतीव लोकैः ॥ ३८ ॥
काचित्तदा मन्त्रिवरं निरीक्ष्य
कश्चिद्विभावं हृदये वहन्ती ।
दृष्टाधरा पाणिपुटैरुरःस्थं
पिण्डीकृतं पीडयति स्म हारम् ॥ ३९ ॥
काचिद्भुजाभ्यां वहिरङ्गभावा-

च्छून्यं यदालिङ्गनमाततान ।
अन्तर्गते मन्त्रिवरेऽन्तरङ्ग-
भावादशून्यं हृदये तदासीत् ॥ ४० ॥

इत्थं गौरवगौरयौररमणीरङ्गत्कटाक्षच्छटा-
गुच्छच्छायमयूरपिच्छघटितच्छत्रच्छविच्छादितः ।
मन्दं मन्दममन्दवन्दिवचनैरानन्द्यमानो ययौ
धन्यः सौधमसौ धरातलसुधाधाराधरो धीरधीः ॥४१॥

मूर्तीस्तीर्थपतेरथालयपदेऽध्यारोप्य लोकं पुनः
सन्मानोचितचातुरीपरिचितः सर्वं विसर्ज्य क्षणात् ।
साक्षादक्षतपात्रपूरितकरमेयःप्रसिद्धाङ्गना-
रङ्गन्मङ्गलवर्धितः स गमयामास स्मितो वासरम् ॥४२॥

किञ्च—

तात ! ख्यातगिरः सुता मम हता ही कालिदासादयो
नन्वेकस्तु चिरायुरस्तु जगति श्रीवस्तुपालोऽधुना ।
मार्कण्डः स्फुटमाशिषा शमवतामल्पायुरप्येष य-
स्कल्पायुर्जयतीति वाग्निगदने धातास्तु जातादरः ॥१॥

श्रीवस्तुपाल ! भवदीययशोऽङ्गजस्य
शश्वन्नभोऽङ्गणविहारमनोहरस्य ।
सारङ्गसङ्गतकरस्तरवारिधारि-
रक्षाभटश्रियमुरीकुरुते सितांशुः ॥ २ ॥

सिन्धुराजविजयोज्ज्वलं यशो
वस्तुपाल ! तव चन्द्रवद्दिवि ।

यत्र दुःखपटलीमलीमसं
सिन्धुराजमुखमेव लाञ्छनम् ॥ ३ ॥
यत्कवेर्लवणसिंहजन्मनः
काव्यमेतदमृतोददीर्घिका ।
वस्तुपालनवकीर्तिकन्यया
धन्यया किमपि यत्र खेलितम् ॥ ४ ॥
मतिसर्गं भवन्त्येऽस्मिन्नरिसिंहविनिर्मिते ।
इमान्यकृत चत्वारि काव्यान्यमरपण्डितः ॥ ५ ॥
॥ इति सुकृतसंकीर्तननाम्नि महाकाव्ये पुरप्रवेशो
नाम दशमः सर्गः ॥ १० ॥

॥ अथैकादशः सर्गः ॥

आसाद्य वीरधवलाधिपतिप्रदत्त-
श्रीस्तम्भतीर्थनगरप्रभुतामथासौ ।
कीर्तीः क्षितौ तनुमतीरिव कीर्तनानि
कर्तुं समारभत मन्त्रिशिरोऽवतंसः ॥ १ ॥
पञ्चासराह्मणहिल्लपुरीपुरन्ध्री-
सीमन्तरत्नमिव पार्श्वजिनेशवेश्म ।
उद्धृत्य येन यशसा जनितो जरत्या
हस्तावलम्बनविधिर्वनराजकीर्तेः ॥ २ ॥
श्रीस्तम्भतीर्थनगरे रचयाञ्चकार

भीमेशवेश्मनि च काञ्चनकेतुकुम्भौ ।
मूर्तेव कीर्तिरनिशं वरवैजयन्ती
नर्नर्ति यत्र दिवि देवनदीं जयन्ती ॥ ३ ॥
उच्चानपट्टमज(त)निष्ट पुरश्च भट्टा-
दित्यस्य मूर्धनि च काञ्चनशेखरं सः ।
तत्रैव दूरतरतापयशःप्रताप-
कारस्करद्वितयसंभवबीजभूते ॥ ४ ॥
भट्टार्कपूजनवने वहकाभिधाने
कूपं व्यधापयदसौ क्षितिनाभिरूपम् ।
दूर्वाङ्कुरप्रकरकर्बुरिताङ्गकुल्या-
मार्गापदेशमिलिताऽसितरोमराजिः ॥ ५ ॥
अग्रेऽपि तत्र बकुलाभिधचण्डभानो-
रुच्चैः सुधामधुरमण्डपकैतवेन ।
स्पष्टीकृतोऽयममुना प्रभवत्प्रभावो
भूमौ चमत्कृतिकृते स्वयशःशशाङ्कः ॥ ६ ॥
श्रीमानखण्डपदमण्डपमत्र मन्त्री
श्रीवैद्यनाथशिवसद्म यदेष चक्रे ।
रोगव्ययाय कृतिनां दधदोषधीशं
तत्रावतारमकृत स्वयमेव देवः ॥ ७ ॥
उच्चैःपदं निजयशोभरसोदरस्य
तक्रस्य तेन विदधे यदशौचभीत्या ।
तत्र स्थितं तदनुवासरमात्मभासा

विक्रेयवस्तुषु हसत्युपरिस्थितिष्ठम् ॥ ८ ॥
अत्रैव साधुकृतयेऽद्भुतपुण्यलक्ष्मी-
नेत्रोपमं वसतियुग्ममसौ चकार ।
यत्र प्रतिक्षणमहोत्सवहेतुभूता
भ्रूविभ्रमं वहति वन्दनमालिकैव ॥ ९ ॥
आरोहवैभवभृतं तरुणीमिवासौ
कुम्भस्तनीमुभयपक्षगवाक्षनेत्राम् ।
तेने प्रपामपि रसप्रसरप्रशस्यां
वीक्ष्यैव यामयति मङ्क्षु न निर्वृतिं कः ॥ १० ॥
तेन व्यधायि धवलक्कपत्तनश्री-
लीलाकुशेशयमिवादिजिनेन्दुचैत्यम् ।
मुक्त्वापि वल्लभजनाननपङ्कजानि
यत्पीयते जनविलोचनचञ्चरीकैः ॥ ११ ॥
अत्रापि तेन वसतिद्वितयं मुनीनां
हेतोरकारि सुकृतामृतपानपात्रम् ।
यस्माद् द्विधा प्रसृमरः शुचिकीर्तिपूरो
विश्वश्रियः श्रयति विस्तृतहारशोभाम् ॥ १२ ॥
या कीर्तिरस्य समभूदिह राणकाख्य-
भट्टारकालयसमुद्धरणेन विश्वे ।
तस्या भुजङ्गमजगद्गमनाय मार्गं
वापीमिपादयमिहैव कृती वितेने ॥ १३ ॥
सा कापि कोमलयशोऽङ्कुरवर्धनाय

धात्रीव तेन रचितेयमिह प्रपापि ।
या पूरयेत तृषितेषु तदात्मजात-
मन्येषु केषु न पयः कलशस्तनोत्थम् ॥ १४ ॥
शत्रुञ्जयाद्रिमुकुटस्य पुरो जिनस्य
तेनेन्द्रमण्डपमिदं तदकारि किञ्चित् ।
अप्येकवारमधिगम्य जना यदन्त-
र्जन्मान्तरेऽपि न भजन्ति कदापि तापम् ॥१५॥
अत्र व्यधापयदयं नवमुज्जयन्त-
श्रीस्तम्भनाधिपजिनाधिपचैत्ययुग्मम् ।
तत्केतुकैतवकरद्वितयेन कीर्ती
रम्येन्द्रमण्डपशिरोभुवि नृत्यतीव ॥ १६ ॥
लक्ष्मीर्मयाऽवलगिता जगदेकभर्तु-
र्भक्त्या ततो वलगयेयमिमां च देवीम् ।
वाग्मूर्तिमत्र रचयन्निति स स्वमेक-
माकल्पमीशमपि वाग्मिनमप्यशंसत् ॥ १७ ॥
मूर्तीर्विधाप्य निजपूर्वजपूरुषाणां
तेनात्र नित्यरुचिपद्मनिभैस्तदास्यैः ।
या प्रीणिता रजनिमीलनशीलपद्म-
दुःस्था किमेनमपि मुञ्चति सापि लक्ष्मीः ॥१८॥
मूर्तित्रयं हरिकरिस्थमपूरि तेजः-
पालस्य वीरधवलस्य तथात्मनोऽत्रा ।
सन्नद्धमुद्धुरकलिमल्लयाय मूर्त-

सम्यं युगत्रयमिवात्र पवित्रदेशे ॥ १९ ॥
चत्वार्ययं चतुरथीरवलोकनाम्ना-
प्रद्युम्नशाम्बनिखराण्यवतार्य तत्र ।
तज्जन्मकीर्तिनिवहस्य चतुर्मुखत्वा-
द्धातुः श्रियं निदधतोऽपि बभूव धाता ॥ २० ॥
आलोक्य वीक्षितपुरातनभूपभक्त्या
चैत्यश्रिया जिनपतेस्तमतीवभक्तम् ।
आनन्दमल्लतनया शिरसीव स्पृष्टौ
पाणी यदीयकननीरणकृतवेन ॥ २१ ॥
श्रीसुव्रतं भृगुपुरादयमत्र मन्त्री

द्वेधाः स्थितिं तदहमत्र मुहुर्निरीक्ष्य ।
अभ्रंलिहाद्रिपतिमूर्धनि कीर्तनौघ-
मेतेन कारितमसङ्ख्यमवर्णयिष्यम् ॥ २५ ॥

श्रीपादलिप्तपुरसीम्नि सरः स चक्रे
यस्यातिरेकमधुरे लुठतीव तीरे ।
नित्यं नितान्तमधुरीभवितुं सुधाम्भ-
म्भोग्यः सुधारुचिरपि प्रतिमामिषेण ॥ २६ ॥

एष स्फुरद्गुरुमुनिमसरामिहैव
स्वर्दण्डदर्शनपरां वसतिं वितेने ।
यस्यां यशःसितरुचिर्विशदः स कोऽपि
जज्ञेऽस्य यत्र विधुरेव बभूव चिह्नम् ॥ २७ ॥

तत्र प्रपेयमपि तेन नवा वितेने
यां प्राप्य शीतमधुरोज्ज्वलहारिवारिम् ।
पीयूषकुण्डहिमधामजमेव गर्व-
सर्वस्वमन्यजगतोर्जगती बभञ्ज ॥ २८ ॥

माधुर्यधुर्यमतुलामृतकुण्डवृन्द-
स्यन्दानुविद्धमिव यत्र जलं रराज ।
ग्रामेऽर्कपालितकनामनि तेन तेने
पातालमूलगतखातगुरुस्तडागः ॥ २९ ॥

श्रीस्तम्भनाख्यपुरतीर्थपतिं विधाप्य
शत्रुञ्जयाचलजिनं च स उज्जयन्ते ।

द्वेधोत्थितैर्दिवि यशोभिरदादपूर्वे
   द्वैराज्यदुःखममृतांशुनभःश्रवन्त्योः ॥ ३० ॥
स स्तम्भनाभिधपुरेऽद्भुतमुद्दधार
   श्रीपार्श्ववेश्म किमपि स्मितवैभवं तत् ।
यत्रागतौ नवकृतप्रतिमाछलेन
   कौतूहलाद्विमलरैवतकाद्रिदेवौ ॥ ३१ ॥
तेन प्रपाद्वयमिहापटि पार्श्वपार्श्व-
   स्थितेव तादृशगुणप्रगुणं किलैतत् ।
छायामनोज्ञममृताभजलं बिभेद
   तापं बहिःस्थमपरं स्थमपि प्रजायाः ॥ ३२ ॥
श्रीवैद्यनाथमदनाल्लिकि मालवेशो
   दर्भावतीभुवि जहार सुवर्णकुम्भान् ।
श्रीकेलिवेश्म सचिवस्तु स वस्तुपाल-
   स्तांजिन् दधौ दिनमणिप्रतिमप्रतापान् ॥३३॥
यत्रेऽर्बुदाह्वगिरिभूमि निजाग्रजन्म-
   श्रीमालदेवसुकृताय स मल्लिदेवम् ।
कैरैर्दशीभिरिति निस्तुलसत्कुलाभि-
   र्निस्मापितं भुवनमुत्प्रमनःसनाथं ॥ ३४ ॥
त्रयः क्व यत्तुलमस्तनिबंहति
   श्रीवस्तुपालसचिवेश्वरकीर्तनानि ।
यत्राद्भुता दिवि विनिर्भरविभ्रमेन्द्र
   दोर्भाहुना सुदृशीव पदानि दातुम् ॥ ३५ ॥

ईदृग्मन्त्रिकिरीटकीर्तनघटासङ्ख्यमानैर्मुहुः
कीर्तीनां निवहैरहंप्रथमिकावष्टम्भसंरम्भिभिः ।
तन्मानाधिकवर्धनव्यसनिभिर्मन्ये विभिन्नं नभः
स्वर्दण्डच्छललक्ष्यमाणविशदप्रस्फोटरेखास्पदम् ॥

किञ्च—

विश्राम्यन्तु भुजङ्गराजरजनीजीवेशराजीविनी-
जीवातुस्तनयित्नवो ! नवनवप्रीत्या भवन्तश्चिरम् ।
यत्स्तम्भं भुजया यशोभिरमलं दीप्तं प्रतापैर्द्विष-
द्बाष्पैः सिक्तमिदं तनोतु भुवनं श्रीवस्तुपालः सदा ॥१॥

विश्वं न स्यादनीदृग्निखिलमपि कदाप्येष लोकप्रवादः
कल्पे कल्पे ततस्त्वं मदयसि विदुषो लब्धपुण्यावतारः ।
कल्पद्रुः कामधेनुस्त्रिदशमणिरपि श्रीवसन्त ! श्रवन्ती-
भूयाम्भोधिं गतानामिति भवति भवद्दानवारां विवर्तः ॥

स्फूर्जत्फेनावलिवलयितोत्तालकल्लोलमाला-
लीलालोलज्जलधिवलयव्याजतो वस्तुपाल ! ।
क्रीडन्त्येता रणभुवि भवत्कीर्तयः स्तम्भतीर्थ-
प्रान्ते प्रीतिस्तवकितरसाः शङ्खदुष्कीर्तयश्च ॥ ३ ॥

विश्वेऽस्मिन्नरिसिंहकोविदकृतप्रौढप्रबन्धाद्भुत-
श्रीमन्त्रीश्वरवस्तुपालयशसी पीयूषपूरोपमे ।
एते हर्षवशादशेषविबुधैरास्वादनीये मिथः-
संक्रान्त्या क्षणलब्धसिद्धिविभवे यावज्जगन्नन्दताम् ॥४॥

द्वैपोत्थितैर्दिवि यशोभिरदादपूर्वं
द्वैराज्यदुःखममृतांशुनभःध्वजस्योः ॥ ३० ॥

स स्तम्भनाभिधपुरेऽद्भुतमुद्दधार
श्रीपार्श्ववेश्म किमपि स्मितवैभवं तत् ।
यत्रागतौ नवकृतप्रतिमाछलेन
कौतूहलाद्विमलरैवतकाद्रिदेवौ ॥ ३१ ॥

तेन प्रपाद्वयमिहापटि पार्श्वपार्श्वे-
ऽस्थित्येव तादृशगुणप्रगुणं किलैतत् ।
यापामनोज्ञममृताभजलं बिभेद
तापं बहिःस्थमबहिःस्थमपि प्रजायाः ॥ ३२ ॥

श्रीवैद्यनाथसदनात्किल मालवेशो
दर्भावतीपुरि जहार सुवर्णकुम्भान् ।
श्रीकेलिवेश्म सचिवस्तु स वस्तुपाल-
स्ताजिन दधौ दिनपतिप्रतिमानिपत्नान् ॥ ३३ ॥

यरेऽर्बुदाग्नयगिरिस्मृति निजाग्रजन्म-
श्रीमालदेवगुरुनाथ स मल्लिदेवम् ।
मरेहर्दाधिपतिभिरञ्जनमञ्जुसाभि-
र्गिरस्मापितं भुवनसुन्दर मनःप्रसाद्रे ॥ ३४ ॥

ईदृग्मन्त्रिकिरीटकीर्तनघटासङ्ख्यमानैर्मुहुः
कीर्तीनां निवहैरहंप्रथमिकावष्टम्भसंरम्भिभिः ।
तन्मानाधिकवर्धनव्यसनिभिर्मन्ये विभिन्नं नभः
स्वर्दण्डच्छललक्ष्यमाणविशदप्रस्फोटरेखास्पदम् ॥

किञ्च—

विश्राम्यन्तु भुजङ्गराजरजनीजीवेशराजीविनी-
जीवातुस्तनयित्नवो ! नवनवप्रीत्या भवन्तश्चिरम् ।
यत्तम्भं भुजया यशोभिरमलं दीप्रं प्रतापैर्द्विष-
द्वाष्पैः सिक्तमिदं तनोतु भुवनं श्रीवस्तुपालः सदा ॥१॥

विश्वं न स्यादनीदृग्निखिलमपि कदाप्येष लोकप्रवादः
कल्पे कल्पे ततस्त्वं मदयसि विदुषो लब्धपुण्यावतारः ।
कल्पद्रुः कामधेनुस्त्रिदशमणिरपि श्रीवसन्त ! श्रवन्ती-
भूयाम्भोधिं गतानामिति भवति भवद्दानवारां विवर्त्तः ॥

स्फूर्जत्फेनावलिवलयितोत्तालकल्लोलमाला-
लीलालोलज्जलधिवलयव्याजतो वस्तुपाल ! ।
क्रीडन्त्येता रणभुवि भवत्कीर्तयः स्तम्भतीर्थ-
प्रान्ते प्रीतिस्तवकितरसाः शङ्खदुष्कीर्त्तयश्च ॥ ३ ॥

विश्वेऽस्मिन्नरिसिंहकोविदकृतप्रौढप्रबन्धाद्भुत-
श्रीमन्त्रीश्वरवस्तुपालयशसी पीयूषपूरोपमे ।
एते हर्षवशादशेषविबुधैरास्वादनीये मिथः-
संक्रान्त्या क्षणलब्धसिद्धिविभवे यावज्जगन्नन्दताम् ॥४

प्रतिसर्गं भवन्त्येऽस्मिन्नरिसिंहविनिर्मिते ।
इमान्यकृत चत्वारि काव्यान्यमरपण्डितः ॥ ५ ॥

॥ इति सुकृतसंकीर्तननाम्नि महाकाव्ये सकलकीर्ति-
कीर्तनो नामैकादशः सर्गः ॥ ११ ॥

॥ समाप्तमिदं सुकृतसंकीर्तनं नाम
महाकाव्यम् ॥